चन्द्रदासकारिकाः

सम्पादक :

डॉ० सत्यप्रकाश शर्मा

त्रयी प्रकाशन, अलीगढ़ ।

चङ्गदासकारिकाः

(अज्ञातकर्तृकटीकया, कृष्णचन्द्रदासकृतवृत्त्या, अज्ञातकर्तृक-टिप्पणस्य सारांशेन च संवलिताः)।

सम्पादक :

डॉ० सत्यप्रकाश शर्मा

संस्कृत-विभागः,

अलीगढ़-मुस्लिम-विश्वविद्यालयः,

अलीगढ़-२०२ ००१.

त्रयी प्रकाशन, अलीगढ़ ।

१९८६ ई०] [प्रथमं संस्करणम्

© Dr. S. P. Sharma *(Editor)*

CAṄGADĀSAKĀRIKĀH

with

An anonymous Tīkā, Vṛtti of Krishnachandradasa and
Gist of another anonymous Tippaṇa.

Edited for the first time

With Introduction, appendixes etc.

By

DR. SATYA PRAKASH SHARMA
Dept. of Sanskrit
Aligarh Muslim University, ALIGARH-202 001
(INDIA)

Edition : **First (1986)**

Price : **Rs. 58.00**

Published by :

Dr. (Smt.) Saroj Sharma

for

TRAYI PRAKASHANA, ALIGARH-202 001

Printed at : NAVYUG PRESS Mahavir Ganj, Aligarh-202001

विषयानुक्रमणी

पुरोवाक्	IV
प्रस्तावना	VII
चङ्गदासकारिका:	१—३१
* सामान्योद्देश: १—१०, त्याद्युद्देश: १०—१२ कृदुद्देश: १२—१७, कारकोद्देश: १७—२५ समासोद्देश: २५—३०, तद्धितोद्देश: ३० ।	
परिशिष्ट १.	३२—३८
चङ्गदासकारिकाणां मूलपाठ:	
परिशिष्ट २.	३९—६५
कृष्णचन्द्रदासकृता वृत्तिसहिता अज्ञातकर्तृक-टिप्पणस्य सारांशेन चान्विताश्चङ्गदासकारिका:	
परिशिष्ट ३.	६६
कारिकाणामकाराद्यनुक्रमणिका	
शुद्धिपत्रम्	६९

* कारिकाणां विषयविभागस्तु प्रस्तावनायां १०म पृष्ठेऽवलोकनीय: ।

पुरोवाक्

अलीगढ़-मुस्लिम-विश्वविद्यालयस्य संस्कृतविभागे प्राध्यापकपदमलङ्कुर्वाणेन विद्वद्वरेण डॉ० सत्यप्रकाशशर्मणा श्री चङ्गदासनिर्मितकारिकावलीति विविध-टीकोपेतं ग्रन्थरत्नं सागरे निमग्नमिव बहिः प्रकाश्य सम्पादितं तच्च मया प्रायेणावलोकितम्। नूनमेवैतत्कार्यं संस्कृतव्याकरणस्य प्रक्रियाकौशलमधि-जिगमिषूणां छात्राणां विदुषाञ्च कृते महते कल्याणाय कल्पिष्यते—अत्र नास्ति संशीतिलेशोऽपि।

ग्रन्थारम्भे कारिकाद्वये त्यादि-तव्यादि-तद्धित-समासैः कर्त्रादिकारकस्योक्तत्वे लिङ्गसंख्याबोधव्यवस्था दर्शिता, तृतीयकारिकायां नाम्नामनेकेषां समुच्चये अवयवाश्रिता समुदायाश्रिता वा संख्या एकार्थे विशेषणे तिप्रत्ययादौ च व्यव-स्थापिता। चतुर्थकारिकायां प्रकृतिविकृत्योर्द्वयोरप्युक्तत्वे किमीया संख्या त्यादिप्रत्ययैरुच्यते, इति संशयः सयुक्ति निराकृतः, प्रकृतेरेव संख्याग्रहणे सिद्धान्तो व्यवस्थापितश्च। परन्तु 'सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः कुण्डले भवतः' इतिपस्पशाह्निकमहाभाष्यपर्यालोचनया विकृतेरपि संख्याग्रहणमाख्यातेन क्रियत इत्यपि ज्ञेयम्। पञ्चमकारिकायां विशेष्येण समं लिङ्गादिकमेकार्थे विशेषणे प्रत्यपादि। यत्र कुत्रचिदुभयोर्मध्ये लिङ्गसंख्ययोर्भेदो दृश्यते—यथा 'वेदाःप्रमाणम्', 'रुक्मिणीसत्यभामे कृष्णस्य दाराः' इत्यादौ तत्र प्रधानं सर्वतो बलवदिति न्यायेन विशेष्यगतसंख्यानुरोधेनाख्यातवचनं प्रयोक्तव्यम्—'वेदाः प्रमाणं सन्ति' इति न तु 'प्रमाणमस्ति' इति, 'रुक्मिणीसत्यभामे कृष्णस्य दाराः स्तः' इति च। एवमेव 'वृक्षः पञ्चनौकाः भवति' इत्यपि द्रष्टव्यम्।

च्व्यन्तस्थलेऽपि 'सुवर्णं कुण्डली भवति, तन्तवःपटीभवन्ति', इत्यादिकं विशेष्यानुसार्येव साधुत्वं भजते। षष्ठकारिकायां लिङ्गसंख्ययोर्भेदेऽपि उपमानोपमेयभावो दर्शितः, यथा 'मत्तमातङ्ग इव कामिनी याति', 'स इव मधुरममी गायन्ति', 'स्वामी इव प्रकृतयः सेव्याः', अपिशब्देनोभयोरभेदेऽपि 'तुरंग इव हस्ती धावति', एषु उपमेयस्य प्राधान्यात्तदनुसारिणी संख्या-ऽऽख्यातेनाभिधीयते। सप्तमाष्टमनवमपद्येषु प्रथम-मध्यमोत्तमपुरुषाणां व्यवस्था साधु प्रतिपादिता 'स च त्वं च अहं च पचामः' इत्यादिरूपेण।

नवमपद्ये—'यदा ह्यर्थेन' इत्यस्य स्थाने 'यदा च्व्यर्थेन', इति पाठ उचितः ।

दशमपद्यतः षोडशपद्यं यावत्—गतिबुद्धि···इत्यस्य सूत्रस्य अकथितं चेत्यादिपाणिनिसूत्रस्याभिप्रायं प्रायेण प्रकाशयति ग्रन्थकारः । सप्तदशपद्यत आरभ्य परस्मैपदात्मनेपदयोश्चर्चा, लकारविशेषाणां चार्थचर्चा, भूत-भविष्यद्-वर्तमानकालादीनां समीक्षा साध्वी समुपस्थापिता ।

चतुर्विंशपद्यतः कृत्य-खल्-क्त-घञ्-युट्-क्ति-आनि-नि-णिन्-अङ्-ङु-क्यप् प्रभृतिप्रत्ययानां तदीयार्थानुसारिप्रयोगाणामन्येषां प्रत्ययानां विषयाणां च स्वरूपवर्णनमतीवाकर्षकं कृतमस्ति । द्वितीयादिविभक्तीनां वाच्यनिर्देशपूर्वक-मुदाहरणप्रदर्शनमनितरसाधारणमनुभूयते । एवमग्रेऽपि कारक-समास-तद्धित-विषयाः सरसया सरलया सुबोधया स्पृहणीयया च भाषया निरूपिताः कस्य सचेतसश्चित्तं नावर्जयन्ति ?

श्रीचङ्गदासो बौद्धो वा वैष्णवो वा इति विचारणायां केचन आचार्या वदन्ति यद् बौद्धमतानुयायी अयं कारिकाविधाता श्रीचङ्गदासः, यतो हि तिप्-णिच्-ल्युट्-क्तिन् इत्यादीनां स्थाने ति-इण्-युट्-क्ति इति रूपं स्वीकरोति । तत्र पकार-चकार-लकार-नकारादयोऽनुबन्धाः 'अनुदात्तौ सुप्पित्तौ, चितः, लिति, ञ्नित्यादिर्नित्यम्, इत्यादिपाणिनिसूत्रैरनुदात्तोदात्तादिस्वरसम्पादने सह-कारिणः सन्ति । एतेषामभावे स्वराभावसम्पत्तिः सूचयति, यद् ग्रन्थकारः स्वरविषये आदरं न करोति, अवैदिकानामेवैतदाचरणम् स्वरविषयकं सम्भा-वनम् । एतेनावैदिकत्वमागतं बौद्धत्वं च सूचितम् । किन्तु कैश्चिदुच्यते विद्वद्वर्यैः यदनुबन्धानासञ्जनं व्याकरणस्य कर्कशत्वापहरणे लाघवार्थमेव । अथ च दासान्तनामधेयेन 'हरिश्च हरश्च कमलासनश्चे' त्याद्युदाहरणदानेन चास्य वैष्णवत्वमेवानुमातुं शक्यते । अस्तु, यः कोऽपि भवेत्, भवतु नाम, तदीया कृतिस्तु सरला सरसा सुस्पष्टा विद्वन्मनोरञ्जनी चास्त्येव, नास्त्यत्र मनागपि सन्देहावसरः ।

एतादृशग्रन्थानां प्रकाशनेन व्याकरणशास्त्रस्य प्रचारः प्रसारश्च भविष्यति, ततश्च संस्कृतभाषायास्तत्र निहितायाः अध्यात्मविद्याया भूयान् समादरः

सम्भाव्यते, ततश्च कामक्रोधलोभादिदोषदूषितान्त.करणा जना एतद्विद्या-प्रभावेण तत्तद्दोषरहिता भूत्वा शान्ता दान्ताः सुखिनश्च भविष्यन्ति येन भारतस्य विश्वस्य च महानुत्कर्षः सम्पत्स्यते ।

महता परिश्रमेण संयोजितः आविष्कृतानेकगवेषणापूर्णपाठभेदस्तु डॉ० शर्मणः सम्पादनक्रियायामवधानातिशयं प्रकाशयति । सुरभारतीसेवाकार्येणानेन प्रसीदन् भगवान् विश्वनाथः श्रीशर्मणे समीचीनं सामर्थ्यं देयादीदृशे महनीयकार्यकरणे इति भगवन्तं सदाशिवं प्रार्थयते—

रामप्रसाद त्रिपाठी

भूतपूर्वोऽध्यक्षो वेदवेदाङ्गसकाये,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम् ।

भाद्रे जन्माष्टम्याम्,
२०४३ वैक्रमे ।

—:०:—

प्रस्तावना

शब्दप्रयोगविज्ञानाय शब्दानुशासनस्यातीव महती सुप्राक्तनी च परम्पराऽऽस्माकं देशे भारते वर्षे । तत्र ऐन्द्र-चान्द्र-सारस्वत-काशकृत्स्न-पाणिनीय-कातन्त्रादिसम्प्रदायाः सन्ति प्रमुखतमा येषु केचित्कालकवलत्वं गताः केचिच्च साम्प्रतमपि पठनपाठने प्रचलिताः दरीदृश्यन्ते । पाणिनीयं तन्त्रं यद्यपि सर्वाण्यप्यन्यान्यतिशेते, तथापि कातन्त्र-सारस्वत-मुग्धबोधादितन्त्राण्यपि वंगोत्कलकश्मीरादिषु अद्यापि यथाकथञ्चित् जीवन्ति । एष्वपि कातन्त्रव्याकरणस्य महती परम्परा विद्यते महनीयञ्च तदीयं वाङ्मयम् । चंगदासोऽपि कातन्त्रसम्प्रदायस्य मध्यकालिकोऽतीवाल्पज्ञातश्च वैयाकरणः ।

ग्रन्थ कर्त्ता—

विभिन्नमातृकासु चंगदासस्य चंगदासो वंगदासः शंगादास इति च नामान्तराणि दृश्यन्तेऽतः विचारणीयोऽयं विषयः । अ, ब, स, द—मातृकासु चंगदास इत्येव नाम अस्ति । किन्तु 'च' संज्ञकमातृकायां तु वंगदासस्य कृतित्वेन विचारणीयग्रन्थस्योल्लेखोऽवाप्यते । पुरालिपिविज्ञानां मतमस्ति यत् लिपकृतोऽनवधानात्तदीयहस्तलेखस्य अवाच्यत्वाद् वा यदा-कदा 'च' अक्षरे या मध्यगततिर्यग्रेखा विद्यते साऽऽतीव सूक्ष्माऽऽस्पष्टा च जायते, येन 'च' इत्यस्य 'व' अथवा 'ब' इतिरूपं परिज्ञायते । अतः सम्भाव्यते यत् चंगदासस्थाने वंगदास इतिरूपमनयैव रीत्या सम्बभूव ।

किन्तु सरस्वतीभवनग्रन्थागारे या सम्बन्धोपदेशनाम्नी मातृका वर्त्तते तत्रास्याः प्रणेतुर्नाम शंगादास इत्युल्लिखितम् । 'च' इत्यक्षरस्य लेखने 'श' इतिरूपं लिपकृतो हस्तस्खलनात्कथमपि न सम्भाव्यते । अतः कोऽयं शंगादास इतिप्रश्नस्तु असमाहित एव भवति । काशिकायां 'शुंगा'[1] इति शब्दः पठितः । चान्द्रव्याकरणेऽपि[2] शब्दोऽयं समुपलभ्यते । परं तत्रेदं नाम जाति-

---

१. काशिकावृत्तिः ४।१।११७.

२. चान्द्रव्याकरणे २।४।४७.

परकं गोत्रपरकं वा विद्यते । अपि च, न तत्र 'शंगा' इतिरूपम् । सम्भाव्यते यत् 'च-श' वर्णयोरुच्चारणस्थानसाम्याद् विशिष्टप्रदेशीयोच्चारणशैलीवशाद्, वक्तुरुच्चारणासामर्थ्याद् वा 'चंग' इति शब्दः 'शंगा' इतिरूपे पर्यणमत् ।

चंगुदासः चांगुदास इति वा 'व्याकरणजीवातु' ग्रन्थस्य प्रणेताऽऽपि विदुषां कृते नास्त्यविदितः ।[1] सम्भाव्यते यत् चंगुदासः चांगुदास इति वा चंगदास इत्यभिधानस्यैव पाठान्तराणि । व्याकरणजीवातुग्रन्थानुपलब्धत्वात् तस्य चंगदासकारिकाभिस्सह तोलनाभावे निश्चप्रचतया न किमपि वक्तुं शक्यतेऽत्र । अतोऽस्माकं निर्णयः यद् ग्रन्थकर्त्तुर्नाम चंगदास इत्येव स्वीकरणीयम् ।

अथाऽऽसौ चंगदासः कं देशमलञ्चकार स्वजन्मनेति न ज्ञायते । परं, नाम्ना उत्कलीयो वंगीयो वेति सम्भाव्यते, यतो हि वंगोत्कलेषु दासान्तनामानि प्रायेण सुप्रचलितानि सन्ति । कारिकासु वृत्तिरपि केनापि कृष्णचन्द्रदासेनैव निबद्धा । सोऽपि उत्कलीयो वंगीयो वेति सम्भाव्यते ।

आसीच्चङ्गदासस्तु बौद्धमतानुयायी । 'स' संज्ञकमातृकायां समुपलब्धे मंगलपद्ये सः 'मञ्जुश्री' देवं प्रणमतिस्म ।[2] मञ्जुश्रीस्तु बौद्धानां ज्ञानदेवता । 'द' संज्ञकमातृकायामपि मंगलाचरणत्वेन 'श्री अर्हन्ताय नमः' इत्युपलब्धत्वाद् ग्रन्थकर्त्तुः बौद्धत्वमेव पुष्यते । यद्यपि पूर्णपुरुषस्य 'अर्हन्त' इत्युपाधिः बौद्धजैनयोः समानतया प्रचलित आसीदिति, तथापि, मञ्जुश्रीस्मरणात् चंगदासस्य बौद्धत्वमेवावगम्यते न तु जैनत्वम् । वृत्तिकारेण 'मञ्जुश्री' इतिपदस्य 'वासुदेव' इत्यर्थः प्रतिपादितः, स तु वृत्तिकारस्यैव वैष्णवत्वं प्रतिपादयति न तु चंगदासस्य, सम्प्रदायविरोधात् क्लिष्टकल्पनाकलनत्वाच्च ।

ग्रन्थनाम—

विविधमातृकासु चङ्गदासप्रणीतस्य ग्रन्थस्याभिधानमपि नैकत्वं भजते । 'अ' मातृकायां स्पष्टरूपेण 'चङ्गदासकारिकाः' इत्येव नाम प्रोक्तम् । 'ब'-संज्ञकमातृकायां टीककर्त्तुः 'कारिकाचङ्गदासस्य टीकेयं रदितं मया' इति-

---

१. अभ्यङ्कर : डिक्शनरी ऑफ् संस्कृत ग्रामर ।

२ द्रष्टव्यम्: चङ्गदासकारिका, प्रथमद्वितीयपरिशिष्टयोः प्रथमः श्लोकः ।

कथनेन ग्रन्थस्य नाम 'चङ्गदासकारिका' इत्येव पुष्यते । परं 'स' संज्ञकमातृकायां ग्रन्थसमाप्तौ 'इतिचंगवृत्तिः समाप्ता' इति वाक्यं समुपलभ्यते, तदेव प्रमाणत्वेनांगीकृत्य भण्डारकरप्राच्यविद्यासंस्थानस्य मातृकासूचीपत्रेऽस्याभिधानं 'चंगवृत्ति' रिति निगदितमस्ति । किन्तु—

'राधे मासि शुक्लपक्ष अष्टम्यां शनिवासरे ।
कृष्णचन्द्रस्य दासेन लिखिता चंगवृत्तिका ॥'

इतिवाक्येन ज्ञायते यद् वृत्तिभागस्तु कारिकांशात्पृथग् वर्त्तते । कारिकाणां कर्त्ता चंगदासः, वृत्तिकर्त्ता च कृष्णचन्द्रदासः । तत्रैव षष्टितमीं कारिकां विवृण्वता वृत्तिकारेण 'इति चंगदासकृतौ समासोद्देशः' इत्युक्तं येन यद्यपि ग्रन्थनाम न स्फुट्यते, परं वृत्तिभागस्य पृथक्त्वं तु पुष्यत एव । ग्रन्थान्ते सः 'इतिचंगवृत्तिविवरणे तद्धितोद्देशः' इत्युक्तवान् येन पुनरपि ग्रन्थनाम 'चंगवृत्ति' रिति, व्याख्याभागस्य च 'वृत्तिविवरणम्' इति ज्ञायते । परम् एकपञ्चाशत्तमकारिकाव्याख्यावसरे सः 'इति चंगदासकृतौ सम्बन्धोद्देशे कारकोद्देशः' इत्युक्तवान् येन ग्रन्थनाम 'सम्बन्धोद्देशः' इति प्रतीयते ।

'द' संज्ञकमातृकायां तु ग्रन्थान्ते 'इति चंगदासकृतौ तद्धितपटलः षष्ठः' इत्युल्लेखाद् ग्रन्थस्य किमभिधानमिति तु न स्फुटीभवति परं ग्रन्थान्तरस्यांशभूतोऽयं ग्रन्थ इति शङ्क्यते ।

'च' संज्ञकमातृकायामपि टीकारम्भे 'क्रियते वंगदासस्य टीकेयं बालबोधिनी', अवसाने च 'इति वंगदासकृतः षष्ठस्तद्धितोपदेशः' इत्युल्लेखाद् ग्रन्थाभिधानस्यास्पष्टत्वं ग्रन्थस्य च ग्रन्थान्तरांशभूतत्वमेव पुष्यते ।

वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसरस्वतीभवनमातृकागारेऽस्य ग्रन्थस्य पाण्डुलिपिद्वयं सुरक्षितम् । तत्रैकस्याः क्रमाङ्कः ३६१२६ वर्त्तते । मातृकासूचीपत्रे तु ग्रन्थनाम 'चंगकारिका', लिपिकालः सं० १६०४ (१८७७ ख्रि०), पत्राणि त्रीणि, षष्ठपटलः इति दर्शितमथ च 'सम्बन्धोपदेश' इति नामान्तरमपि सम्भावितम् । तत्रैव अपराऽऽपि मातृका ३६१६२ क्रमांके निर्दिष्टा यस्या विवरणे 'ग्रन्थनाम सम्बन्धोपदेशः, ग्रन्थकर्त्ता शंगादासश्चंगदासो वा, पृष्ठानि पञ्चाशीति, लिपिकालः सं० १७६६ (१६०६ ख्रि० ?), षष्ठाध्यायान्तः' इति सूचितम् । एवमस्य ग्रन्थस्य चंगदासकारिका, चंगकारिका,

चंगवृत्तिः, सम्बन्धोद्देशः, सम्बन्धोपदेशश्चेति बहूनि नामानि समुपलभ्यन्ते। परं सम्बन्धोपदेशेत्यभिधानेनोल्लिखितायां मातृकायां पञ्चाशीति पत्राणि सन्ति येनास्या इतरमातृकापेक्षया विशालतरत्वं बहुप्रतिपादकत्वञ्च स्फुट्यते। अतोऽनुमीयते यत् चंगदासकारिका चंगकारिका वा चंगदासकृतस्य सम्बन्धोपदेशेतिग्रन्थस्यैव केवलं षष्ठः पटलः षष्ठपटलान्तो वा भागः। सरस्वतीभवनस्थमातृका तु कृतेऽपि महति प्रयासेऽनुपलब्धैवाभवत्। अतस्तस्या अत्रोपयोगो कर्तुं नाशक्नुवमहम्। अतएवास्माभिरत्र संस्करणे ग्रन्थाभिधानं चंगदासकारिकाः' इत्येव स्वीकृतम्।

ग्रन्थस्य स्वरूपम्—

ग्रन्थेऽस्मिन् पष्टिसंख्याकाः कारिकाः विलसन्ति। किन्तु 'स' संज्ञकमातृकायां मंगलाचरणात्मिकैका पृथक्कारिका प्राप्यते यया सहात्र कारिकाणां संख्या एकषष्टीति संजायते। कारिकाणां विषयवस्तु षट्सु उद्देशेषु उपदेशेषु वा विभक्तम्, यथा—

सामान्योद्देशः	१ कारिकातः		१६ कारिकापर्यन्तम्।		
त्याद्युपदेशः	१७	,,	२३	,,	।
कृदुद्देशः	२४	,,	३३	,,	।
कारकोद्देशः	३४	,,	४९	,,	।
समासोद्देशः	५०	,,	५९	,,	।
तद्धितोद्देशः	६० कारिकायाम्।				

'स' संज्ञकमातृकायां 'तद्धितोद्देशः', 'द' संज्ञकमातृकायाञ्च 'तद्धितपटलः षष्ठः' इत्युल्लिखितमवाप्यते। अत्र प्रयुक्तासु सर्वास्वपि मातृकासु उपरिप्रोक्ता एव षडुद्देशाः प्राप्यन्तेऽतः किमयं ग्रन्थः पूर्णोऽपूर्णो वेति विचारणीयो विषयः। सर्वास्वपि मातृकासु तद्धितोद्देश एव षष्ठः। 'द' संज्ञकमातृकायामपि स एव षष्ठः निगदितः, केवलं तत्र उद्देशस्थाने पटलशब्दः प्रयुक्तोऽन्यत्र तु तस्यामपि मातृकायां पटलस्थाने उद्देशस्योपदेशस्यैव वा ग्रहणं कृतमस्ति। अतोऽनुमीयते यत् लिपिकारप्रमादादत्र उपदेशस्य स्थाने पटल इति सञ्जातः। अन्यथाप्यनुमातुं शक्यते यत् सम्बन्धोपदेशनामकस्य ग्रन्थस्य विषयविभागः पटलेषु विभक्तो भवेत्तस्यैव च षष्ठपटलभूतेयं चङ्गदासकारिकाऽऽपि स्यात्। परं ग्रन्थस्य विषयवस्तु परिपूर्णमस्ति, अतो ग्रन्थस्याप्यपूर्णता नैव सम्भाव्यते।

ग्रन्थस्य वैशिष्ट्यम्—

व्याकरणस्य व्यावहारिकपरिज्ञानाय चङ्गदासीयकारिकाणां महती उपयोगिता वर्त्तते। अत्र सन्धि-नाम-तिङन्तप्रयोगाः न साधितास्तेषामध्ययनाय पाणिनि-कातन्त्र-सारस्वतप्रभृतिव्याकरणग्रन्थानां समुपलब्धत्वात्। किन्तु वाग्व्यवहारे संस्कृतशब्दाः कथं प्रयोक्तव्याः, कीदृशश्च वाक्यविन्यासो कर्त्तव्य इति शिक्षणार्थमेव चङ्गदासीयोऽयं सुप्रयासः। कृत्तद्धितप्रत्ययानां, समासानां विभक्तीनाञ्च वाक्यार्थेन कीदृशः सम्बन्धः, कथं च ते व्यवहर्त्तव्या इत्येव विषयोऽत्र सरलभाषया सम्यक्प्रतिपादितश्चंगदासेन स्वनामधन्येन। अत एवास्य ग्रन्थस्य नामान्तरं 'सम्बन्धोपदेश' इत्यपि समुपलभ्यते। विषयस्योपयोगितां दृष्ट्वैव रभसनन्दिनापि 'सम्बन्धोद्योत' इतिग्रन्थः प्रणीत असीत्। तस्यैका मातृका सरस्वतीभवनग्रन्थागारे ३८७६३ क्रमांकेऽद्याप्यप्रकाशितैव सुरक्षिताऽस्ति।

चङ्गदासीयोऽयं ग्रन्थः व्याकरणस्य कातन्त्रपरम्परामनुवर्त्तते, इति सुस्पष्टं जायते उभयोर्ग्रन्थयोः परस्परतोलनेन। यथा—समासोद्देशेऽधोऽङ्कितानि कातन्त्रीयसूत्राणि तत्तत्कारिकासु सुद्रष्टव्यानि—

१. नाम्नां समासो युक्तार्थः २।५।१
२. पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः २।५।५
३. तत्पुरुषावुभौ २।५।७
४. विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु।
समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषश्च स ॥२।५।८
५. स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि।
तान्यन्यस्य पदस्यार्थे बहुव्रीहिः..... ॥२।५।९
६. दिशां वा २।१।३६
७. विदिक् तथा २।५।१०
८. द्वन्द्वः समुच्चयो नाम्नोर्बहूनां वापि यो भवेत् २।५।११
९. अल्पस्वरतरं तत्र पूर्वम् २।५।१२
१०. यच्चार्चितं द्वयोः २।५।१३
११. पूर्वं वाच्यं भवेद् यस्य सोऽव्ययीभाव इष्यते २।५।१४

संज्ञाविषयेऽपि चंगदासः कातन्त्रमेवानुसरति, यथा—

१. हेतुः—कारयति यः स हेतुश्च २।४।१५

२. समासः—नाम्नां समासो युक्तार्थः २।५।१
३. कर्मधारयः—पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः २।५।५
४. ह्यस्तनी (भूतकालार्थे)— ३।१।२७
५. अद्यतनी (वर्त्तमानार्थे)— ३।१।२८
६. श्वस्तनी (लुट् लकारार्थे)— ३।१।३०
७. भविष्यन्ती (लृट्)— स्यसंहितानि त्यादीनि भविष्यन्ती ३।१।३२
८. कृत्य—(तव्य, अनीय, क्यप्, घ्यण्, य प्रत्ययानाम्)— ४।२।४६

क्यङ्-चिण्-णिच्-यक्-क्यच्-क्स-सु, इतिपाणिनीयप्रत्ययानां स्थाने आयिः-इच्-इन्-यण्-यिन्-सण्-सि-इति कातन्त्रीयाः प्रत्ययाः, शप्-श्नम्-श्ना-श्नुः-श्यन्-इतिपाणिनीयविकरणस्थानेषु अन् (अव्इति वा)-न-ना-नु-यन्इतिकातन्त्रसम्मताः प्रत्ययाः ग्रन्थकारेण चंगदासेन सर्वत्रैव स्वीकृता वर्त्तन्ते। एवमेव लट्-लिट्-लुट्-लृट्-लङ्-लिङ्-लोट् इत्येषां लकाराणां स्थाने तेन वर्त्तमाना (अद्यतनी वा) परोक्षा-श्वस्तनी-भविष्यन्ती-ह्यस्तनी-सप्तमी-पञ्चमी इति संज्ञाः स्वीकृताः याः कातन्त्रीये सम्प्रदाये सन्ति सुप्रसिद्धाः।

विषयवस्तूपन्यासस्यातीवसारल्यं ग्रन्थस्य महद्वैशिष्ट्यमस्ति। वस्तुतः, प्रारम्भादेव कातन्त्रपरम्पराया उद्देश्यं व्याकरणस्य सरलीकरणमासीत्। केवलं १४०० सूत्रेषु समग्रमपि लौकिकं व्याकरणमत्र समुपवर्णितमस्ति, अत एवेदं व्याकरणं का+तन्त्रम् इति निगद्यते।[1] कातन्त्रीयं साहित्यं वंगोत्कल-कश्मीरकेरलतमिलराजस्थानेषु प्रभूततया समुपलभ्यते।[2]

कालनिर्णय :—

चंगदासस्य कालविषये न कापि प्रामाणिकी सूचनाऽद्य सम्प्राप्ता भवति। परं त्रयोदशशतकादारभ्य षोडशशतकं यावत् कातन्त्रे सारल्यदृष्ट्या नैकाष्टीकाः कारिकारूपेण प्रणीताः समभवन्, यथा—कातन्त्रवृत्तिः। अवचूरि-उमापति-प्रभृतयोऽपि विद्वांसः श्लोकबद्धटीका रचयामासुः। नैकाश्च स्वतन्त्राः कारिकाः मनीषिभिर्विरचिता बभूवुर्यथा—चर्करीतिरहस्यकारिका, कातन्त्रविभ्रम-कारिकाः। अतोऽनुमीयते यत् चंगदासोऽपि १३-१६ शतकान्तराले वर्त्तमान आसीदित्यलं पल्लवेन।

---

१. ईपदर्थे 'कु' इत्यस्य 'का' आदेशः—'का' त्वीषदर्थेऽक्षे, कातन्त्र २/५/२५
२. डॉ. जानकीप्रसाद द्विवेदः-कातन्त्रव्याकरणविमर्शः (वाराणसी), अध्याय-१, पृ० ६-१७।

मातृकाणां परिचयः—

संस्करणमिदं सम्पादयता मया विविधस्थानेभ्यश्चंगदासकारिकायाः पञ्चमातृकाः सम्प्राप्ता यासु चतस्र एव समवलोकिता सम्प्रयुक्ताश्च। तासां परिचयोऽधः प्रदीयते—

अ—अलीगढ़-मुस्लिम-विश्वविद्यालयीये संस्कृतविभागे सुरक्षितेयं मातृका तत्रैव हिन्दी-विभाध्यक्षचराणां दिवङ्गतानां डॉ० गोवर्धननाथ शुक्ल-महाभागानां प्रपितामहानामलीगढ़वास्तव्यानां श्री वैकुण्ठनाथ शुक्ल-चरणानां कृते केनचिद् द्विजपूर्णशर्मणा प्रतिलिपीकृताऽऽसीत्। प्रतिलिपि-कालस्तु मार्ग कृष्णा ५ रविवासरं सं० १९३० (१८७३ खिष्टाब्दः) निर्दिष्टः। अत्र पत्राणि २६, प्रतिपृष्ठे पंक्तयः सप्त, प्रतिपंक्तौ च प्रायेण द्वात्रिंशदक्षराणि सन्ति। अक्षराणि सुवाच्यानि लिपिश्च देवनागरी वर्त्तते। अत्र ग्रन्थनाम तु **'चङ्गदासकारिकाः'** इत्येवास्ति कारिकाश्च सटीका विद्यन्ते। टीकाकर्त्तुर्नामनिर्देशाभावात् तद्विषये न किञ्चिज्ज्ञायते। ग्रन्थान्ते टीकाकृता चङ्गदासकारिकाणामुपयोगिता विषये सडिण्डिमं समुद्घोषितम्—

चङ्गदासे कृतेऽभ्यासे किं करिष्यन्ति वादिनः।
चङ्गदासेत्वनभ्यासे मा कश्चित्पण्डितायताम्॥

तदनन्तरं केचिच्छन्दःशास्त्रीयाः श्लोका अपि प्राप्यन्ते ये सन्ति विषयातिरिक्ताः। अर्थनीतिपरकोऽप्येकः श्लोकस्तत्र वर्त्तते। एतेषां स्फुटपद्यानां कर्तृत्वादिविषयेऽपि न किमपि ज्ञायते।

मातृकेयमस्माभिरत्र आदर्शप्रतितया स्वीकृता, यद्यपि अन्यमातृका-साहाय्येन यत्र-तत्र पाठोऽपि संशोधितः।

ब—प्रयागस्थगंगानाथझा केन्द्रीयसंस्कृतविद्यापीठस्य पाण्डुलिपिसंग्रहालये व्याकरणम् २७०/४३३२ क्रमाङ्के संगृहीतेयं मातृका। अत्र कारिकाणां तु नितान्तमभावः। केवलमाद्याक्षरैष्टीकाग्रे कारिकानिर्देशो विहितः। मातृकेयमतीव भ्रष्टा। अत्र काश्चित्कारिका अटीकितैव वर्त्तन्तेऽतस्तासा-मनुल्लेखात् कारिकाणां क्रमः संख्या च अस्तव्यस्ततां गता। टीकेयं केनापि

आश्विनकृष्णनवम्यां गुरुवासरे प्रणीताऽऽसीत् । कस्मिन् हायने ? इति तु न ज्ञायते । टीकाकर्त्तुरत्रापि नामनिर्देशाभावः । यथा 'अ' मातृकायां तथैवात्रापि आदौ 'श्रीगणेशायनमः' इतिमङ्गलाचरणं विद्यते । अत्र या टीका वर्त्तते सा तु विपुलपाठभेदैः 'अ' मातृकास्थटीकया प्रायेण सङ्गच्छते । ग्रन्थनाम तु 'चङ्गदासकारिका' इत्येव वर्त्तते ।

मातृकायामत्र पत्राणि त्रयोदश, प्रतिपृष्ठे १०-११ पंक्तयः, प्रतिपंक्तौ च प्रायेण ३४-३५ अक्षराणि सन्ति । अक्षराणि सुवाच्यानि लिपिश्च देवनागरी वर्त्तते । मातृकेयं शकशालिवाहनस्य १७६२ तमेऽब्दे (१८४० खिष्टाब्दे) पूर्णतामगादिति निगदितमत्र । लिपिकृतोऽभिधानोल्लेखाभावात्तद्विषयेऽपि न किमपि जानीमः । मातृकालेखनकालसूचकं समाप्तिवाक्यं किं टीकाकारस्यैवास्तीति न सुनिश्चितम् । मङ्गलाचरणेन टीकाकारस्तु आस्तिको ब्राह्मणपौराणिकधर्मानुयायी च प्रतिभाति । प्रतिपत्रे उपरि वामपार्श्वे 'श्रीः' दक्षिणपार्श्वे च 'रामः' इत्युल्लेखाल्लिपिकारो वैष्णव आसीदित्यवगम्यते ।

स—पुण्यपत्तनस्थभण्डारकरप्राच्यविद्यासंस्थानसंग्रहालये ६५५/१८८४-८६ क्रमाङ्के चङ्गवृत्तिरिति नाम्ना संगृहीतेयं द्वादशपत्रमयी मातृका हमीरविजयनामकेन लेखकेन लिपीकृताऽऽसीत् । अस्याः लिपिकालस्तु भाद्रपदकृष्णाऽऽमावस्या रविवासरम् सं० १८९९ (१८४२ खि०) इति निर्दिष्टः । अत्र कृष्णचन्द्रदासविरचिता 'चङ्गवृत्ति' रितिनाम्नी वृत्तिरपि सन्निविष्टाऽऽस्ति । कोऽसौ वृत्तिकारः कृष्णचन्द्रदासः? कुत्र कदा च सोऽभवदिति तु न ज्ञायते । सः राधेमासि शुक्लपक्षे अष्टम्यां शनिवासरे वृत्तिं लिखितवान् । परं लिखक्रियाप्रयोगेनात्रापतति सन्देहो यत्कृष्णचन्द्रदासो वृत्तिकार आहोस्वित् वृत्तिलेखकमात्र एवासीत् ? किन्तु 'राधेमासि शुक्लपक्ष०' इत्यादिवाक्यस्य श्लोकरूपत्वादवगम्यतेऽथ च निश्चीयते कृष्णचन्द्रदासस्य वृत्तिकारत्वम् ।

अत्र मङ्गलाचरणात्मिकैका या नूतनी कारिका दृश्यते सा इतरमातृकासु नोपलभ्यते । अनया सह कारिकाणां संख्याऽऽत्र ६१ वर्त्तते । लिपिकृतोऽनवधानतया कारिकाक्रमाङ्केषु क्वाचित्की विसङ्गतिरपि

दृश्यते । अन्यथा त्वियं मातृका शुद्धप्रायैवास्ति । सुवाच्याक्षरमयी लिपिस्तु देवनागरी एव ।

वृत्तिरियमस्माभिः प्रकृतसंस्करणे द्वितीयपरिशिष्टे सम्पाद्याविकलतया प्रकाशितास्ति ।

द—इयमपि मातृका पुण्यपत्तनस्थभण्डारकरप्राच्यविद्यासंस्थानसंग्रहालये सुरक्षितास्ति । तत्रास्याः क्रमाङ्कस्तु ४९३/१८८६-९२, अभिधानञ्च चङ्गवृत्तिरिति निर्दिष्टम् । परं मातृकायां कुत्रापि चङ्गवृत्तिरित्यभिधानस्य निर्देशो नोपलभ्यते । पत्रत्रयात्मिकेयं मातृका प्रतिपृष्ठे कारिकाणां नवपंक्तयः, प्रतिपंक्तौ च प्रायेण चतुश्चत्वारिंशदक्षराणि धत्ते । कारिकाणां सर्वतोऽपि पार्श्वेषु टिप्पणात्मिका काचित् लघीयसी टीकाऽऽपि लघ्वक्षरैः लिखिता । अस्माभिरत्र संस्करणे द्वितीयपरिशिष्टे **टिप्पणमितिनाम्ना** सा सारांशतया (न तु सकलतया) समाविष्टा । टीकाकर्त्ता तु अज्ञात एव । ग्रन्थारम्भे 'श्री अर्हन्ताय नमः' इति यन्मङ्गलाचरणं विद्यते तदन्यत्र न दृश्यते ।

मातृकायां प्रतिलिपिकारस्य प्रतिलिपिकालस्य च न कोऽपि सङ्केतोऽत्राप्यते । लिपिस्तु देननागरी एव, किन्तु तत्र पृष्ठमात्राणामुपयोगेन, थ ध, भ प्रभृत्यक्षराणां विविधसंयुक्ताक्षराणाञ्च विशिष्टलेखनप्रकारेण, सर्व्व-कर्म्मादिषु द्वित्वाक्षरप्रयोगेण चास्याः समय उपरिनिर्दिष्टमातृकाणामपेक्षया प्राचीनतरः प्रतीयते ।

च—मातृकेयं गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठस्थपाण्डुलिपिसंग्रहालये व्याकरणम् २६९/४२३१ क्रमाङ्के सङ्कलिता सुरक्षिता च । एकोनविंशतिपत्रमयी मातृकेयं सकारिकां बालबोधिनीतिनाम्नीं टीकां धत्ते । अस्याः लिपिस्तु नास्ति सुस्पष्टतरी । तत्र वंगासमियाक्षराणां यत्र-तत्र च कीलकाक्षराणां प्रयोगात् तत्पठने सर्वथाऽक्षमोऽहं सज्जातोऽतोऽत्र संस्करणे तस्याः सदुपयोगं कर्तुं नापारयम् । कृते महति प्रयासे केवलमियद्ज्ञातुमशक्नुवं यद्—"अत्र मङ्गलाचरणतया 'श्री गणेशाय नमः' इति वाक्यं टीकारम्भे कारिकारम्भेऽपि च विद्यते । 'क्रियते वंगदासस्य टीकेयं बालबोधिनी' इत्यनेन

टीकानाम बालबोधिनीति कारिकाकर्त्तुश्च नाम वंगदास इति ज्ञायते। लिपिकालस्तु सन् १२७० (अथवा १२९० ?) प्रदत्तः।" लिपिकालोऽयं वङ्गाब्देन निर्दिष्टश्चेत्तदा ऽऽसौ १८६३(अथवा १८८३) खृष्टाब्दो भवेत्।

अ, ब मातृकाश्रितोऽयं कारिकाग्रन्थः यदा मुद्रितप्राय आसीत्तदा भण्डारकरप्राच्यविद्यासंस्थाने समुपलब्धं मातृकाद्वयं मया समासादितम्। अतस्तयोर्द्वयोरपि मातृकयोर्द्वितीयपरिशिष्टे स्वतन्त्रतया समावेशोऽत्र विहितः, पाठभेदतोलनञ्च न सञ्जातम्।

कृतज्ञताप्रकाशनम्—

ग्रन्थस्यास्य सम्पादनकाले विद्वद्भिरनेकैरनेकधा समुपकृतोऽहं सञ्जातः। विद्यागुरुचरणेषु सादरमनेकशोऽभिवादनानन्तरं प्रथमं तु अलीगढ़मुस्लिमविश्वविद्यालये संस्कृतविभागाध्यक्षाणां प्रो० परमानन्दशास्त्रिणामाधमर्ण्यं हृदयेन स्वीकृत्य तेषां पादपद्मेषु मुहुर्मुहुः प्रणमामि। तदनु च गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्यपदमलंकुर्वतां सहजविदुषां डॉ० गयाचरणत्रिपाठिमहाभागानामथ च भण्डारकरप्राच्यविद्यासंस्थाने मातृकासंग्रहालयाध्यक्षपदं राजां डॉ० पी० डी० नवाथे महोदयानामविस्मरणीयं साहाय्यं न विस्मर्तुं शक्यते यैस्तत्तद्ग्रन्थागारेषूपलब्धमातृकाणां छायाप्रतयः सम्प्रेष्यानुगृहीतोऽहम्। अतः कृतज्ञताज्ञापनपुरस्सरं तान् प्रणामाञ्जलिभिरर्चयामि। गुरुकल्पैर्विद्वच्छिरोमणिभिः लब्धयशस्कैः पण्डितप्रवरैः डॉ० रामप्रसादत्रिपाठिचरणैरत्र पुरोवाक्—लेखनेनाशीराशिभिश्च संयोजितो संवर्धितश्चाहमतस्तेषां चरणेषु प्रणतमस्तको भूत्वा प्रणामाञ्जलिमावेदयामि। पर्यवसाने गुरुवर्य्येषु आ० रमेशचन्द्रशुक्लचरणेषु सादरं सकार्त्तज्ञञ्च प्रणम्य विदुषां करकमलेषु ग्रन्थरत्नमिदं समर्पयन् परमां मुदमावहति—

आश्विन कृष्ण प्रतिपदायाम्
२०४३ वैक्रमाब्दे।
अलीगढ़े।

विदुषां वशंवदः
सत्यप्रकाश शर्मा

॥ चङ्गदासकारिकाः प्रारभ्यन्ते[1] ॥

श्री गणेशाय नमः ॥

मूलम्[2] ॥

यस्मिन्नर्थे विधीयन्ते त्यादितव्यादितद्धिताः ।
समासो वा भवेद् यत्र स उक्तः प्रथमा ततः[3] ॥१॥

अस्यार्थः[4]—अंकुरो भवति, अवगाहते सरसीं[5] कुञ्जरः, अवगाह्यते सरसी कुञ्जरेण । तव्यादिर्यथा—वसेस्तव्यः[6], कर्त्तरि दीर्घश्च रूढित्वाद् वास्तव्यो देवदत्तः । अनुक्तः कर्त्ता यथा—कर्त्तव्यः कटो भवता । तद्धितप्रत्ययो यथा—वैयाकरणो[7] देवदत्तः, शतिकः पटः[8] । समासो यथा[9]–आरूढवानरो वृक्षः ॥१॥

उक्तस्यार्थस्य गृह्णाति संख्यानं त्यादयः परम् ।
लिङ्गसंख्याविभक्तीस्तु कृत्तद्धितसमासजाः ॥२॥

अस्यार्थः[10] —पुरुषः करोति, पुरुषौ कुरुतः, पुरुषाः कुर्वन्ति । कारकः पुमान्, कारिका स्त्री, कारकं कुलम्, वैयाकरणः पुरुषः, वैयाकरणी स्त्री[11],

---

१. 'ब' पुस्तके शीर्षकोऽयं न दृश्यते ।
२. 'ब' पुस्तके 'मूलम्' इति पाठः सर्वत्रानुपलब्धोऽग्रेऽपि । अतोऽस्माभिरपि अयमनवीक्षितः ।
३. 'ब' पुस्तके मूलकारिकाः न दृश्यन्ते ।
४. 'ब' पुस्तके 'अस्यार्थः' इतिस्थाने व्याख्येयकारिकाया आद्याक्षरैः संकेतः कृतः सर्वत्रैव । यथाऽत्र "यस्मिन्नित्यादि" इत्यनेन ।
५. 'अ' सरसीः, ब—सरः ।
६. ब–वसेस्तव्या ।
७. ब–वैयाकर्णो ।
८. अ-पुस्तके तु पार्श्वे 'शतेन कृतः' इत्यधिकः पाठः ।
९. ब-आरूढो वानरोऽप्र वृक्षः स इत्यधिकः पाठः ।
अ-पुस्तके तु पार्श्वे 'आरूढो वानरो यस्मिन् सः' इति पाठः ।
१०. ब-उक्तेत्यादि ।
११. ब-उदाहरणमिदं न दृश्यते ।

वैयाकरणं कुलम्[१], आरूढवानरो वृक्षः, आरूढवानरा शाखा, आरूढवानरं वृक्षाग्रम् ॥२॥

द्वयोर्नाम्नोर्बहूनां वा यदि वाक्यं समुच्चये।
अङ्गचयाश्रिता संख्या त्याद्यादौ वा विशेषणे ॥३॥

अस्यार्थः[२] —अङ्गमवयवश्चयः समुदायः, तदाश्रिता संख्या वा[३] ज्ञेया—हरिश्च हरश्च जयति जयतो[४] वा, जितवान् जितवन्तौ वा; हरिश्च हरश्च कमलासनश्च[५] जयति जयन्ति वा, पूजितव्यः पूजितव्याः वा[६], तेजस्वी तेजस्विनो वा[७]; दत्तकुसुमः दत्तकुसुमा वा[८]। आदिशब्देन कृत्तद्धितसमासेषु—स च त्वं च गतौ गतोर्[९] वा ॥३॥

प्रकृतेर्विकृतेर्वापि यत्रोक्तत्वं द्वयोरपि।
वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्न तु ॥४॥

अस्यार्थः[१०] —सुवर्णं कुण्डले भवति[११], वीरणानि[१२] कटः क्रियन्ते, सुवर्णानि क्रियन्ते कुण्डलम्[१३], तण्डुलाः पच्यन्ते ओदनः ॥४॥

विशेष्येण [१४]सहैकार्थं भवेद्यत्र[१५] विशेषणम्।
तत्र लिङ्गादयः प्रायो विशेष्यस्था विशेषणे ॥५॥

अस्यार्थः[१६] —द्विजः पण्डितो भवति, कटः क्रियते महान्[१७], देवदत्तेन चतुरेण कृतम्, ब्राह्मणाय कुलीनाय देहि[१८], महतः पर्वतादवरोहति[१९]। वीरस्य

---

१. ब-उदाहरणमिदं न वर्त्तते।
२. ब-द्वयोरित्यादि।
३. ब-वेति पदं नास्ति।
४. ब-जयतः जयति वा।
५. ब-कमलाशनश्च।
६. ब-पूजयितव्यः पूजयितव्या वा।
७. अ-उदाहरणमिदं न दृश्यते।
८. ब-दत्तकुशुमः दत्तकुशुमा वा।
९. ब-गतः गतौ वा।
१०. ब-प्रकृतेत्यादि।
११. अ-स्वर्णं कुले भवति।
१२. ब-वीराणि।
१३. उदाहरणमिदं न दृश्यते।
१४. अ-पुस्तके उपरि पार्श्वेऽत्र 'एकार्थविभक्तिकानामर्थयोरभेदान्वयः' इति टिप्पणी वर्तते।
१५. अ-भवेय्यत्र (?)
१६. ब-विशेष्येत्यादि।
१७. ब-क्रियते कटो महान्।
१८. अ-उदाहरणमिदं नोपलभ्यते।
१९. अ-इदमपि नोपलभ्यते।

राज्ञः पुरुषः, समुद्रे महति रत्नानि सन्ति[1] । एवमनेकविशेषणेऽपि बोद्धव्यः[2] । प्राय इतिवचनात् क्वचिल्लिङ्गसंख्याः[3]—न गृह्णन्ति[4] दानपात्रं श्रोत्रियाः ॥५॥

लिङ्गसंख्याविभेदेऽपि उपमानोपमेयता ।
विभक्तिः पुनरेकैव उपमानोपमेययोः ॥६॥

अस्यार्थः[5] —लिङ्गभेदेऽपि[6] तावत्—मत्तमातङ्ग इव कामिनी विहरति, संख्याभेदे तावत्—स इव मधुरममी[7] गायन्ति, लिङ्गसंख्ययोर्भेदेऽपि[8] तावत्[9]—स्वामीव प्रकृतयः सेव्याः, अपिशब्दादभेदेऽपि[10] तावत्—तुरङ्ग इव हस्ती धावति ॥६॥

प्रयुक्ते[11] गम्यमाने वा युक्ते युष्मदि मध्यमः ।
तथास्मद्युत्तमस्ताभ्यामन्यत्र प्रथमो भवेत् ॥७॥

अस्यार्थः[12] —त्वं करोषि, युवां कुरुथः, यूयं कुरुथ । त्वं क्रियसे[13], युवां क्रियेथे[14], यूयं क्रियध्वे[15] । एवं करोषि[16] । एवमस्मद्यपि[17] बोद्धव्यम् । प्रयुक्ते गम्यमाने वा—एवं नाम्नि प्रथमः पुरुषो[18] भवति ॥७॥

एकदा चेत्क्रियाकालवचनप्रतिपादनम् ।
धातोर्नामादिषूक्तेषु यः परः स पुमान् भवेत् ॥८॥

अस्यार्थः[19] —यदि एकस्मिन् काले क्रियाकालवचनानि प्रतिपाद्यानि

---

१. अ-इदमपि न दृश्यते ।
२. अ-एवमनेकविशेषणोऽपि बोद्धव्यम् ।
३. ब-०लिङ्गविभक्तीर्न्न०— ।
४. ब-गृन्हन्ति ।
५. ब-लिङ्गेत्यादि ।
६. ब-'अपि' इति नास्ति ।
७. ब-स इवामी मधुरं गायन्ति ।
८. अ-लिङ्गसंख्याभेदेऽपि ।
९. अ-'तावत्' इति नास्ति ।
१०. ब-अभेदे तावत् ।
११. अ-पुस्तकेऽत्रोपरिपार्श्वे 'प्रयुक्ते कोऽर्थः विद्यमाने बोध्ये वा' इति टिप्पणी वर्तते ।
१२. ब-प्रयुक्ते इत्यादि ।
१३. ब-त्वं कुरुषे ।
१४. ब-युवां कुर्व्वथे ।
१५. ब-यूयं कुरुध्वे ।
१६. अ-पाठोऽयं न दृश्यते ।
१७. अ-अस्मद्योगे ।
१८. ब-प्रथमपुषो ।
१९. ब-एकदेत्यादि ।

भवेयुस्तदा नाम्नि युष्मदस्मदोश्च उक्तेषु सत्सु पुरुषाणां मध्ये यः परः स पुरुषो भवति, यथाभिसम्बन्धपर्यायतः[१] प्रथममध्यमोत्तमेषु प्राप्तेषु परस्परापेक्षया[२] वर्तमानेषु निश्चयोऽयम्, यथा—स च त्वं च पचथः, अत्र प्रथमान्मध्यमः परः[३]; † स चाहं च पचावः, अत्र प्रथमादुत्तमः परः; त्वं चाहं च पचावः [अत्र] मध्यमादुत्तमः परः; स च त्वं चाहं च पचामः, अत्र प्रथममध्यमाभ्यामुत्तमः परः ।† एषु प्रथमादिषु विधानसूत्रे कृत[४] एवं पूर्वपरादिभावः[५] । तेन त्वं च स च पचथः[६] इत्यादिप्रयोगविपर्य्ययेऽपि रूपं[७] प्रतिपत्तव्यम्[८] ॥८॥

यदाह्यर्थेन निर्देश्ये भवतो युष्मदस्मदी ।
द्वयोरप्युभयोर्योगे[९] न धातोर्मध्यमोत्तमौ ॥९॥

अस्यार्थः[१०] —अत्वं त्वं सम्पद्यते, अनहमहं सम्पद्यते, त्वद्भवति, मद्भवति ॥९॥

गतिबुद्ध्यशनार्थानां शब्दार्थानामकर्म्मणाम् ।
भवेदनिणि यः कर्त्ता इण्यसौ कर्मसंज्ञकः ॥१०॥

अस्यार्थ[११] :—गच्छति ग्रामं देवदत्तः, गमयति ग्रामं देवदत्तं यज्ञदत्तः । बोधयति[१२] शास्त्रं देवदत्तं यज्ञदत्तः । खादति कदलीं पोतः, खादयति तमपरः । वदति शास्त्रं देवदत्तः, वादयति तमपरः । तिष्ठति देवदत्तः, स्थापयति तमपरः[१३] ॥१०॥

हृक्रोरनिणि यः कर्त्ता इण्यसौ कर्म्म वा भवेत् ।
आत्मने विषये तद्वदभिवादिदृशोस्तथा ॥११॥

---

१. ब-यथासम्बन्धं यद्यपितः ।
२. ब-परस्परोक्षया ।
३. ब-अत्र परत्वात्प्रथममध्यमः परः ।
†† ब-पुस्तके तारकद्वयमध्याङ्कितपाठस्तु न दृश्यते ।
४. ब-वृत्ते ।
५. ब-पूर्व्वादिभावः ।
६. ब-स च त्वं च पचथः ।
७. ब-इत्यादिप्रयोगेऽतिरूपम् ।
८. अ-प्रतिवक्तव्यम् ।
९. अ-द्वयोरप्यभयो० ।
१०. ब-यदेत्यादि ।
११. ब-गतीत्यादि ।
१२. ब-पुस्तके १२—१३ अङ्कयोर्मध्यगः पाठो न दृश्यते ।

अस्यार्थः[1] —हरति रुक्मिणीं[2] कृष्णः, हारयति रुक्मिणीं[3] कृष्णं कृष्णेन वा दूतः। करोति भोजनं ब्राह्मणः, कारयति भोजनं[4] ब्राह्मणं ब्राह्मणेन वा सुकृती[5]। वदेर्ण्यन्तादिण्[6] चौरादिको वादिरित्येके। एवमभिवादि इतिरूपे स्थिते[7] पुनर्हेतौविण्[8], अभिवादयते वृद्धान् कुमारः, अभिवादयते वृद्धान् कुमारं कुमारेण वा जनकः[9]; पश्यति नृत्यं राजा[10], दर्शयते राजानं राज्ञा वा नृत्यं नर्त्तको वा[11]। आत्मनेपदविषये नियम इतिवचनात् परस्मैपदविषये[12] विकल्पो न भवति; अभिवादयति देवान् दानपतिना[13] शंखवादकः। प्रयोज्यकर्त्तुरनुक्तत्वात्[14] दानपतिशब्दात्[15] तृतीयैव[16] ॥११॥

नीखादह्वादिशब्दायक्रन्दां कर्त्ता न कर्म्म सः।
वहेरसारथौ हेतौ भक्षेर्धातोर्हिंसने ॥१२॥

अस्यार्थ.[17] —[18]नीखादह्वादिशब्दायक्रन्दि एषाम् अनिणि यः कर्त्ता स इणि सति कर्मसंज्ञको न भवति, प्राप्तौ सत्यां निषेधः। नीधातोर्गत्यर्थतया प्राप्तिः, खादधातोर्भोजनार्थतया; ह्वयतेः शब्दार्थतया, अदिधातोर्भक्षणार्थतया, शब्दायधातोः शब्दतया, क्रन्दिधातोरकर्म्मकतया प्राप्तिः। अजां ग्रामं नयति देवदत्तः, नाययति ग्राममजां देवदत्तेन यज्ञदत्तः; खादति कन्दलीं पोतः, खादयति पोतेन कन्दलीं जननी; ह्वयति श्येनं बालः, ह्वाययति बालेन कुतूहली[19]; अत्ति

---

१. ब-हृकोरित्यादि। २,३. ब-रूक्मिनीं।
४. ब-भोजनमितिपदं नास्ति। ५. ब-नृपतिः।
६. अ-वदेर्ज्यन्तादिण्, ब-वदेर्व्वगन्त्यदिन् (?)।
७. ब-एवमभिवादिति स्थिते रूपे। ८. ब-पुनर्हेतुविन्।
९. ब-कुमारेणेति वा-इति स्वतन्त्रः पाठः। १०. ब-पश्यति राजानं भृत्यः।
११. ब-दर्शयते राजानं भृत्यमिश्वरः भृत्येनेति वा।
१२. ब-०विषयो। १३. ब-दावपतिना।
१४. ब-प्रयोज्यकर्त्तव्यमनुक्तत्वाद्। १५. अ-पदमिदं न दृश्यते।
१६. अ-नियमो न भवति पाठान्तरमित्यधिकः पाठ उपलभ्यते।
१७. ब-निखादीत्यादि।
१८–१९. ब-व्हादिशब्दायक्रन्द एषामनिनि यः कर्त्ता कर्मसंज्ञयेन नयतेर्गत्यर्थतया व्हयते शब्दार्थतया शब्दायक्रन्दोरकर्म्मकत्वात्प्राप्ते प्रतिषेधः। अजां नयति ग्रामं देवदत्तः, अजां नाप य देवदत्तेन यज्ञदत्तः, खादयति कदलीं पोतः, खादयति कदलीं पोतेन जननी, व्हयति श्येनं श्येनपालः, व्हयति श्येनं श्येनकुतूहली।

गुडं बालः, आदयति गुडं बालेन जननी; शब्दायते कीचकः, शब्दाययते कीचकेन वायुः[१]; क्रन्दति[२] बालः, क्रन्दयति बालेन जननी[३]। [४]वहेरसारथौ हेतौ अनिणि यः कर्त्ता स इणि सति कर्म्मसंज्ञको न भवति—वहति भारं ग्रामं देवदत्तः[५], वाहयति भारं ग्रामं देवदत्तेनापरः[६]; सारथौ तु[७]—वहन्ति वलीवर्द्दाः शकटम्, वाहयति वलीवर्द्दान् शकटं[८] सारथिः। [९]भक्षेरहिंसने अनिणि यः कर्त्ता स इणि सति कर्म्मसंज्ञको न स्यात्—भक्षति[१०]गुडं पोतः, भक्षयति गुडं पोतेन जनकः। हिंसायान्तु[११]—भक्षयन्ति खगान् श्येनान् वाजपालकाः ॥१२॥

प्रधानं नीवहादीनां दुहादेरुपसर्ज्जनम्।
कर्म्मस्वीयमिणन्तानां वाच्यकर्त्ता प्रयोजकः ॥१३॥

अस्यार्थः[१२]—नीयते ग्राममजा[१३] देवदत्तेन, नेतव्या, नीयमाना, नीता[१४]। उह्यते भारो ग्रामं[१५] देवदत्तेन, वोढव्यो, वहनीयो[१६], वाह्यः। उह्यमानः ऊढः सुवहः[१७]।[१८]आदिशब्दाद्-ह्रियते[१९] भारो ग्रामं देवदत्तेनेत्यादि। [२०]दुहादीनां यथा—दुह्यते गौः पयो गोपेन[२१], दोग्धव्या दोहनीया वा[२२]। [२३]गम्यते ग्रामो[२४] देवदत्तो यज्ञदत्तेन वा[२५]। यस्य[२६] ग्रामगतिबुद्धीत्यादिवचनात् अनिणि[२७] सति कर्त्तरि इणि[२८] सति कर्म्मसंज्ञा विहिता—स [२९]देवदत्तादिरिणन्तानां स्वीयं कर्म्म तदेवकर्म्मजैः[३०] प्रत्ययैरभिधीयते ॥१३॥

---

१. ब-शब्दायति कीचकेन मातुरः।
२. ब-क्रन्दयति। ३. ब-दुर्ज्जनः।
४. ब-वहेरित्यादि—वहेरतिनि यः कर्त्ता इति सति कर्म्मसंज्ञो न भवति।
५. ब-उदाहरणमिदं न दृश्यते। ६. ब-यज्ञदत्तः।
७. ब-सरथौ पुनः प्रयोज्यके विधिरेव। ८. ब-शकट ग्रामं।
९. ब-भक्षेरित्यादि—अशनर्थत्वात्प्राप्ते प्रतिषेधः। १०. ब-भक्षयति।
११. ब-हिंसपी विधिरेव—भक्षयन्ति वलीवर्द्धाः शस्यं, भक्षयति वलीवर्द्दान् शस्यं गोरक्षकः।
१२. ब-प्रधानमित्यादि। १३. ब-ग्राममना। १४. ब-पदमिदं न दृश्यते।
१५. ब-पदमिदं नास्ति। १६. ब-वाहनीयः। १७. ब-सुववा।
१८. ब-शदि (?)। १९. ब-ह्रीयते। २०. ब-द्रुहादीनां।
२१. ब-गोपालकेन। २२. ब-वेतिपदं नास्ति। २३. ब-ययेत्यधिकः पाठः।
२४. अ-ग्रामं। २५. ब-वेतिपदं नास्ति। २६. ब-ग्रामेतिपदं नास्ति।
२७. ब-आंनणि (?)। २८. ब-इनि। २९. ब-देवदत्तादि तिनमनां (?)।
३०. ब-कर्मजैरितिपदं न दृश्यते।

अभावादभिधेयस्य अन्यदप्याह कर्म्मजः ।
नाभिधत्ते तु कालादीन् कर्म्मणोऽन्यस्य सम्भवे ॥१४॥

अस्यार्थः[१] —दुह्यन्ते[२] गवां गोषु वा पयांसि[३] गोपालेन । याच्यते पौरवात् पौरवस्य पौरवे वा कम्बलं ब्राह्मणेन । चीयन्ते फलानि वृक्षाद् वृक्षस्य वृक्षे वा पथिकेन[४] । मासमधीयते शिष्येण[५] । क्रोशं गुडधानाभिभुज्यन्ते[६] देवदत्तेन[७] ॥१४॥

यदेवोक्तं विशेष्येण त्यादिना यदि वा कृता ।
विशेषणक्रियानुक्तमप्युक्तं तद्भवेदिति ॥१५॥

अस्यार्थः[८]—त्यादिना[९] कृता च वा[१०] क्रियावता विशेष्येण यदुक्तं तयोर्विशेषणक्रियानुक्तमपि[११] तदुक्तं भवति, यथा—ओदनं भुक्त्वा ग्रामं[१२] गच्छति देवदत्तः गतो वा, भोजनपूर्वकं गमनं करोतीत्यर्थः । दातुं[१३] पचति[१४] देवदत्तः पक्ता वा, दानार्थं[१५] तत्पचनमित्यर्थः । भोजनदानाभ्यां[१६] विशेषण-क्रियाभ्यां[१७] विशेष्येण[१८] गमनपचनक्रियावता[१९] त्यादिना कृता वा[२०] कर्त्तरिविहितेन कर्तृयदुक्तमित्यतः[२१] प्रथमा । नानुक्तकर्त्राश्रिता[२२] तृतीयापि, एवमानीय गुरुः पूज्यते पूजयितव्यो[२३] वा । आमन्त्र्य ब्राह्मणो[२४] भोज्यते[२५] भोजयितव्यो वा । आनयनादिकं तत्पूर्वादिकमित्यर्थः[२६] । भोक्तुमोदनः[२७]

---

१. ब-अभावादित्यादि ।
२. ब-दुह्यते ।
३. ब-पयान्ति ।
४. ब-पथिकेनेति ।
५. ब-उदाहरणमिदं नोपलभ्यते ।
६. अ-गुडधानानुभूयते ।
७. अ-देवदत्तेनेति पदं नास्ति ।
८. ब-यतित्यादि अस्यायमर्थः ।
९. ब-त्यादिन ।
१०. ब-वेति पदं नास्ति ।
११. ब-तयोविशेषणक्रियया अनुक्तमपि ।
१२. ब-ग्राममिति पदं नास्ति
१३. ब-द्वातुं ।
१४. ब-वचति पचति ।
१५. ब-दानार्थं ।
१६. ब-भोजनदाताभ्यां ।
१७. अ-विशेषेणक्रियाभ्यां ।
१८. ब-विशेषण ।
१९. ब-क्रिया वापचत् ।
२०. ब-त्यादिता वा ।
२१. ब-कर्त्ता यदुक्तमित्यता ।
२२. ब-कर्त्ताश्रिता ।
२३. ब-युजुज्यते युज्ययितव्यो ।
२४. ब-ब्राह्मणे ।
२५. ब-भोमोज्यते ।
२६. ब-अनयातादिकतत्पूजादिकम् ।
२७. ब-०दनष्पच्यते ।

पच्यते पक्तव्यो वा[1]। भोजनार्थं तत्पचनमित्यर्थः[2]। दातुमुपक्रियते घटः[3] उपकर्त्तव्यो वा। ततश्चानयनादपि विशेषणेन अनुक्तमपि[4] पूजादिक्रियावता[5] विशेष्येण त्यादिना यदि वा कृता च कर्म्मणि विहितेन उक्तं कर्म्म। अतः प्रथमा, न पुनरुक्तकर्माश्रिता द्वितीयापि ॥१५॥

उक्तमेवोक्ततां याति क्वचिदुक्तमनुक्तताम्।
अनुक्तमपि चोक्तं स्यात्क्वचिदेव पदान्तरैः ॥१६॥

अस्यार्थं[6]—पदान्तरैरिति वक्ष्यमाणपदैरिति[7] सम्बन्धः। आख्यातकृत्तद्धित-समासैर्यदुक्तं[8] तदप्येतैरेव[9] पदान्तरैः पुनरुक्ततां याति उक्तं भवतीत्यर्थः, यथा नृत्यति गायति नटः। पठति[10] शृणोति छात्रः। अधीते अध्यापयति माणवकः[11]। यजते[12] याजयति द्विजः। ददाति प्रतिगृह्णाति[13] द्विजः। देवदत्तेनौदनः पच्यते भुज्यते वा। पाठको[14] देवदत्तः। दाता भोक्ता पुण्यवान्[15] दृष्टः, सत्पुरुषः स्मृतोऽपि गतः[16], तथागतः पापानि हन्ति, ताम्बूलं भक्षयन्[17] विलासी[18] हसति हस्यते वा। तिर्य्यग्[19] विलोकयन् कामिनी[20] मालापयन् सुन्दरोऽपि[21]

---

१. ब-पक्तव्यो वेति पदद्वयं न वर्त्तते। ततः "अस्यार्थः पदान्तरैरिति वक्ष्यमान पदेन सम्बन्धः, आख्यातकृत्तद्धितसमासैर्य्यदुक्तं तद्व्ये (ष्ये) भिरेव पदान्तरैः। पुनरुक्तां याति उक्त भवतीत्यर्थ :—यथा नृत्यति गायति नटः, दारुमुपक्रियते नटः, पचति शृणोति छात्रः, अधीते अध्यापयति मान (ण) वकः, जपते जाप (-य) ति द्विजः, ददाति गृन्हा (ह्णा) ति द्विजः, देवदत्तेन ओदनः पच्यते पक्तव्यो वा" इत्यधिकः पाठस्त्वसङ्गत एव अग्रिमकारिकाव्याख्यानभूतत्वात्, अ पुस्तके तु स तत्रैव वर्त्तते।

२. अ, ब-पुस्तकयोः वाक्यमिदमग्रिमवाक्यानन्तरम् अक्रमिकतया विद्यते। क्रमस्त्वस्माभिः संशोधितः।

३. ब-दारुमुपक्रियते कटः उपक्तेतव्यो (?) वा। भोजनार्थ (र्थं) तत्पचनमित्यर्थः। अत्र पाठस्य क्रमस्त्वसङ्गतः।

४. ब-ततश्च प्रणादिना विशेष्येण नानुक्तमपि।

५. ब-०वतादि विशेष्येणेत्यादिता (ना) कृता कर्म्मणि विहितेन उक्त कर्म्म, अतः पुंसुनुक्र (क्त ?) कर्म्मकथिता तृतीय (या) द्वितीया मा ॥१५॥

६. ब-उक्तमन्ये कृतामिति अस्यायमर्थः। ७. ब-वक्ष्यमान पदेनेति।

८. ब-समासैर्युक्तं। ९. ब-ततव्ये (ष्ये) भिरेव। १०. ब-पचति।

११. ब-मानवकः। १२. ब-यजति। १३. ब-गृन्हाति।

१४. ब-याचको। १५. ब-पुन्यवा।

१६. अ-गत इतिक्रियापदं 'तथागत' इति पदानन्तरं, तच्चासङ्गतत्वादत्र क्रम संशोधितः।

१७. ब-पदमिदं न दृश्यते। १८. ब-बाला। १९. अ-तीर्यग्, ब-तीर्य्यकं।

२०. ब-नामालपयन्। २१. ब-सुन्दरीति।

शोभते सद्भाष्यते[1] वा । पीयमानं[2] मधु मदयति मधुपतिः[3], श्रूयमाणं वचनमद्भुतायते[4] श्रूयते[5] लोकः[6], विद्यमानो भृतकः खादयति चिन्त्यते वा, अधीयमानो ब्राह्मणोऽपि[7] शोभते जीयते वा । भुञ्जानोऽवसीदति जनो[8] दृश्यते वा; वैयाकरणः छात्रो विवदते जीयते वा, नैयायिकः पण्डितो जल्पति[9] निराक्रियते[10] वा, शतिकः पटः शोभते परिचीयते वा, दाधिक[11] ओदनः प्रीणाति भुज्यते वा[12], आरूढवानरो[13] वृक्षः कम्पते निरीक्ष्यते वा । कृतप्रणामो जनकः[14] प्रारभ्यते श्लाघ्यते वा[15], दारितदारूः कुठारः[16] कुण्ठी भवति[17] निशायते वा[18], दत्तगुर्ब्राह्मणस्तुष्यति[19] अनुगृह्यते वा[20] । [21]लम्बकर्णः कार्णाटको विस्मयते परिष्क्रियते[22] वा । मत्तबाहुर्मातङ्गः वनं भीषयते गम्यते वा । उक्तमनुक्तामिति—क्वचित्पदान्तरैर्यातीति सम्बन्धः । नृत्यन्तं नटमवलोकयति जनः । आगच्छन्तम् अभ्यागतं प्रत्युद्गच्छत्याचारकुशलः । वर्द्धमानं व्याधिमवधारयति अनात्महितः, उपेक्षते शत्रुम् उत्तिष्ठमानमनभिज्ञः, वैयाकरणमध्यापकं शब्दान् पृच्छति जनः, शतिकमश्वं लभते वदान्यः । आरूढवानरं तरुमवलोकयति कौतुकिकः, आरूढवानरेण तरुणा विस्माप्यते लोकः, कृतप्रणामाय पुरुषाय ददाति । अनुक्तमिति—नृत्यते गीयते नटेन, पठ्यते श्रूयते छात्रेण, भोक्तुमोदनं पचति बुभुक्षितः, दातुं धनमुपार्जयति सत्पुरुषः, कटं

---

१. सद्भाश्यते । २. ब-प्रतियमान । ३. ब-पदमिदं न दृश्यते ।
४. ब-श्रूयमान वचनमद्भुतं । ५. ब-वेत्यधिकः पाठः ।
६. ब-लोक इति पदं नास्ति । ७. ब-ब्राह्मणः भोजीयते वा ।
८. ब-भुञ्जानो भावसीदति जनः । ९. ब-जल्पन्ति । १०. ब-मिराक्रियते ।
११. ब-दधिक । १२. ब-वेतिपदं नास्ति । १३. ब-वानस्तरुः ।
१४. ब-जनः । १५. ब-पदमिदं नास्ति । १६. ब-पदमिदं नास्ति । १७. ब-भवतीति ।
१८. ब-पदद्वयमिदं नास्ति । १९. ब-पठति । २०. ब-पदद्वयमिदं नास्ति ।
२१. ब-पुस्तके तु पाठस्यायं क्रमः—'अनुगव (?) लोकते जनः आगच्छन्तमभ्यागतम् प-त्युद्गच्छत्याचारकुशलः, वर्द्धमानं व्याधिमवधीरयति, अनात्महतः उपेक्षते शत्रुमुत्तिष्ठ-मानमभिज्ञः, वैयाकरणमध्यापक शब्दान् पृच्छति जनः ॥१६॥ [अत्र कारिका-क्रमाङ्कस्त्वसङ्गतः] । ह्यते वा उछन्न जनपदा भूमिः, उद्वेजयते त्यजते वा; लम्बकर्णः कार्णाटो विस्मायते, परिक्रियते मन्ते (?) बाहुमातङ्गं भीषयते न गम्यते वा । उक्तमनुक्तामिति क्वचित्पदान्तरैर्य्यातीति सम्बन्धः, नृत्यतं नरमस्मायते लोकः, कृतप्रणामाय पुरुषाय ददातीत्यादि अनुक्तनिव ति बुभुक्षितः दातुं धनमुपार्ज्यति सत्पुरुषः, कटं कृत्वा ददाति, आनीय गुरुं पूजयति इत्यादि ॥१७॥ [अत्रापि कारिकाक्रमाङ्को भ्रान्तिकरः] २२. परिस्क्रियते ।

कृत्वा ददाति, आनीय गुरुं पूजयति। अनुक्तमुक्ततां याति—आनीय गुरुःपूज्यते, पश्य मृगो धावति ॥१६॥

परस्मै वक्ति कर्त्तारं त्रीनर्थानात्मेनपदम्।
भावाद्ये विहिते सार्वधातुके यण्[1]सम्भवे ॥१७॥

अस्यार्थः—परस्मैपदं कर्त्तारं वक्ति, षडाद्याः सार्वधातुकम्, आत्मनेपदं त्रीनर्थान् वक्ति भावाद्ये विहिते सार्वधातुके [2]यण्सम्भवे सति ॥१७॥[3]

सर्वे विकरणाः कर्तृविहिते सार्वधातुके।
अद्यतन्यां विभक्तौ सिच्[4]सण् स्यात्कर्तृकर्म्मणोः ॥१८॥

अस्यार्थः—अन्ये ये सर्वे विकरणाः अवादयस्ते कर्तृविहिते सार्वधातुके भवन्ति। कर्त्तरि अद्यतन्यां विभक्तौ कोऽर्थः ? लुङ्लकारे सिच् स्यात्, कर्तृकर्म्मणोरद्यतन्यां विभक्तौ सन् प्रत्ययः स्यात् ॥१८॥[5]

[6]चङ्णणौ कर्त्तरि स्यातामिच्प्रायो भावकर्म्मणोः।
स्वस्तनीस्यसिजाशीः सुभावे कर्मणि चेज्वदिट् ॥१९॥

अस्यार्थः—कर्त्तरि चङ्णणौ प्रत्ययौ स्याताम्, भावकर्म्मणोः इच् प्रत्ययो बाहुल्येन स्यात्, भावे कर्मणि स्वस्तन्या सुपूइट्-स वा इज्वद् भवति। इचा तुल्यं इज्वत्, तत्फलं वृद्धिवैकल्यम् ॥१९॥

ह्यनिग्रहिदृशिभ्यश्च स्वरान्तेभ्यो विभाषया।
अतिपत्तिः परोक्षा च ह्यस्तन्य[7]द्यतनीति च ॥२०॥

---

१. अ-यट। २. अ-यण।

३. ब-पुस्तके त्वस्या या टीका साऽऽस्माभिः १६ तमायाः कारिकायाः पादटिप्पण्यां प्रदत्ताऽऽस्ति। तत्र प्रकृतकारिकायास्तु सर्वथाऽऽभाव एव।

४. अ-सिच।

५. ब-पुस्तके तु १८ तमे क्रमेऽस्मत्स्वीकृता विंशतितमी कारिका विद्यते। प्रकृतकारिकायास्तु सर्वथाऽऽभाव एव।

६. अ—चङ्णणौ। ब-सटीकेयं कारिका न विद्यते। ७. अ-०स्तन्यद्य०।

अस्यार्थः[१]—एभ्यो धातुभ्योऽतिपत्तिः क्रियातिक्रमः परोक्षाणवादिः[२]। स्वस्तनीत्यादिः[३]। [४]अद्यतनी लुङ्[५]लकारः, एते प्रत्यया विभाषया विकल्पेन इचा तुल्यं भवन्ति। घनिता[६], हन्ता; ग्राहिता[७], ग्रहिता[८]; दर्शिता[९], द्रष्टा[१०]; दापिता[११] दाता। स्य[१२] यथा—घानिष्यते[१३] हनिष्यते[१४]। सिच् यथा—अघानिषातामित्यादि[१५]। आशिषि यथा—घानिषीष्ट[१६], वधिषीष्ट[१७] इत्यादि ॥२०॥

[१८]चतस्रोऽतीतकाले स्युर्वर्त्तमाना तु सम्प्रति।
भविष्यति भविष्यन्त्याशीरप्यन्वर्थतो भवेत् ॥२१॥

अस्यार्थः—चतस्रो विभक्तयोऽतीतकाले भूतकाले स्युः, भविष्यन्ती भविष्यति अर्थेऽभवत्, आशीरपि भविष्यर्थादभवत् ॥२१॥

[१९]स्वस्तने स्वस्तनी नित्यं सैवान्यत्र विभाषया।
विध्यादौ सप्तमी पञ्चम्यप्यनुज्ञाशिषोश्च सा ॥२२॥

अस्यार्थः—स्वस्तने नित्यं स्वस्तनी विभक्तिस्तादिः स्यात्, सा स्वस्तनी अन्यत्र विभाषया विध्यादौ, आदिशब्देन सम्भावने; सप्तमी विभक्तिः[२०] पादादिः स्यात्, अनुज्ञाशिषोश्च प्रेरणे च आशिषि सप्तमी विभक्तिस्तुवादिः स्यात् निश्चयेन ॥२२॥

भावे शब्दान्तरप्रयोगेऽपि स्युरन्यत्र स्वगोचरात्।
एवं विज्ञाय विज्ञेन प्रयोगः प्रतिपाद्यताम् ॥२३॥[२१]

---

१. ब-हनिग्रहीत्यादि।
२. ब-सम्पूर्णमिदं वाक्यं न विद्यते।
३. ब-स्वस्तनीष्वादि। अ-स्वस्तनीतादि।
४. ब-इदमपि समग्रं वाक्यं न वर्त्तते।
५. अ-लुङ।
६. ब-घानितः।
७. ब-ग्राही।
८. ९. १०. ११. ब-उदाहरणानि न दृश्यन्ते।
१२. ब-एवं स्व यथा, अ-स्ये। १३. ब-घानिष्येते। १४. ब-इत्यादि-इत्यधिकः।
१५. ब-इत्यादिस्थाने अवधिषाताम् इति पाठः। १६. ब-घानिषिष्ट।
१७. ब-अवधिषिष्ट। १८. ब-सटीकेयं कारिका न दृश्यते।
१९. ब-सटीकेयं कारिका न दृश्यते। २०. अ-विभक्तीः।
२१. ब-पुस्तके ऽस्याः कारिकायाः किञ्चित्पाठान्तरेण व्याख्या १९-२० क्रमाङ्कयोः समानतया विद्यते।

अस्यार्थः[१]—वर्त्तमानाद् या[२] विभक्तयः स्वगोचरात् स्वविषयाद् अन्यत्रापि शब्दान्तरसम्बन्धे[३] भवन्ति। तत्रायं संग्रहः—"स्मशब्दस्य प्रयोगे तु[४] नानन्वोर्विभाषया[५] । वर्त्तमाना विभक्तिस्तु [६]स्मृताभूतार्थवादिनी[७] ।" [८]ददहतिस्म त्रिपुरं हरः, दग्धवानित्यर्थः। [९]नन्विह प्रतिवाक्येन - अकार्षीः कटं, नाकरोमि, न कृतवानस्मि इत्यर्थः। एवं न्वकार्षीः कटं कृतवानस्मि—इत्यर्थः। भूतविहितापि ॥२३॥

भावे कर्मणि कृत्याः स्युः कर्मकर्त्तरि केलिमः।
अन्यत्रापि क्वचित्कृत्याः खलर्थो भावकर्म्मणोः ॥२४॥[१०]

अस्यार्थः—भावे कर्मणि कृत्याः प्रत्ययाः स्युः, कृत्याः पञ्च समाख्याताः क्यश्ध्यणौ भावकर्म्मणोः, तव्यानीयौ स्वराद्यश्च, केलिमः कर्म्मकर्त्तरि इति ग्रन्थान्तरम्, केलिमः कर्मकर्त्तरि स्यात्, भावकर्मणोरन्यत्रापि, क्वचित्कृत्यः खलर्था[११] भवेत् ॥२४॥

भावकरणयोः खल् स्यादाशितोपपदाद्भवः।
कृञः ख्युट् करणे वाच्ये टक्सकौ क्विप् च दृश्यते ॥२५॥[१२]

---

१. ब-अस्यापमर्थः । २. ब-वर्त्तमानादयो ।

३. ब-शब्दान्तरसम्बन्ध (१६) शब्दान्तरप्रयोगे सम्बन्धे (२०) ।

४. ब-०स्तनुवन्धोर्वि० (१६), अ-प्रयोगेन ननु नन्वोर्विभा० ।

५. ब-वर्तमानविभाषयेत्यधिकः पाठः (२०)। ६. ब-स्मेन ।

७. ब-वाचिनी (१६)। ८. ब-दधति (२०) ।

९. ब-पुस्तके त्विद आरभ्य पाठस्यायं क्रमः—"ननुशब्दयोगे—नन्वकार्षीः [ननु करोमि भोः—२०] वर्त्तमानविभाषया अद्यतनीविभक्तिर्भवति, ननु प्रातरकार्षीः कटं, ननु करोमि भोः कृतवानित्यर्थः। [नान्वह प्रतिवाक्ये एवं नाकार्षीः कटम्, न करोमि भोः, न कृतवानस्मि—इत्यर्थः। एवं न्वकार्षीः कटं नु करोमि भोः, नु कृतवानस्मि इत्यर्थः। पक्षे भूतविभक्तावपि। २०] एवं नु पाकमपाक्षं नु करोमि भोः ॥१६॥

१०. ब-कारिकेयं न वर्त्तते । ११. अ- अ-खलर्थाः ।

१२. ब-इयमपि कारिका न दृश्यते।

अस्यार्थः—इत्याद्युपदेशः—आशितोपपदात् भूधातोर्भावे करणे खल्प्रत्ययः कृधातोः करणे वाच्ये भावकरणयोः ख्युट् स्यात्, चकार इवार्थः, इवार्थे दृशिधातोः टक्सकौ क्विप् प्रत्ययश्च भवति ॥२५॥

गत्यर्थात् क्तो भवेद् भूते भावाद्याधारकर्त्तृषु ।
अव्याप्यात्कर्त्तरि क्तः स्यादथवाधारभावयोः ॥२६॥[1]

अस्यार्थः—अव्याप्योऽकर्मको धातुः, तस्मात्कर्त्तरि क्तः स्यात्, अथवा भावे आधारे च अकर्म्मकात् क्त प्रत्ययो भूतकाले गत्यर्थाद्धातोर्भावादौ, आदिशब्दात्कर्त्तरि कर्म्मणि च भूतकाले क्त प्रत्ययो भवेत् ॥२६॥

भावाधिकरणे व्याप्ये भक्षार्थात् क्तः प्रकीर्त्तितः ।
भावे मात्रे पुनर्धातोरविवक्षितकर्मकात् ॥२७॥

अस्यार्थः[2]—[3]भक्षार्थाद्धातोर्भावेऽधिकरणे कर्मणि भूते क्तः प्रत्ययः, भावे तु—भक्षितं देवदत्तस्य देवदत्तेन वा, अधिकरणे—भक्षितं भोजनमोदनस्य विप्रस्य वा, अधिकरणवाचिनः क्तस्य कर्त्तरि कर्म्मणि चोपादानात् षष्ठी, कर्मणि—भक्षित ओदनो भवता । न विवक्षितं कर्म यस्य तस्माद्धातोर्भावे एव केवले क्तो भवति, कर्म्मणोऽविवक्षया सकर्मकोऽप्यकर्मक इति, तस्माद् भावे क्तः, विवक्षितकर्म्मकाद् धातोः कर्त्तरि अधिकरणे च क्तः, भावे—कृतं देवदत्तेन ॥२७॥

श्लिषः शीङो वसोजृषेर्भ्रासःस्याजन्रुह.परः ।
त्रिषु क्तः स्यात्तथारम्भे शेषेभ्यः कर्म्मणि स्मृतः ॥२८॥

अस्यार्थः[4]—एते धातवो यदि[5] सोपसर्गा अनुपसर्गा वा [6]अकर्मकास्तदा

---

१. ब-इयमपि कारिका न दृश्यते ।

२. ब-पदमिदं न दृश्यते ।

३. ब-न विवक्षितं कर्म्म यस्य तस्माद्धातो भाव एव केवलेऽतीते क्तो भवति, कर्म्मणो विवक्षा सकर्म्मको ऽप्यकर्म्मक इत्यविवक्षितकर्म्मत्वद्धात्वोरकर्म्मकाश्रयः कर्त्तुरधिकरणयोरपि क्तः अप्रत्ययो भवतीति परिणतार्थः । भावे यथा क्त देवदत्तेन भक्षनं भक्षः सोऽभिधेयो यस्य स, भक्षार्थे धातुस्तस्माद् भावेऽधिकरणे कर्म्मणि अतीते क्तः प्रकीर्त्तित कथितः भावे । भक्षितं देवदत्तेन देवदत्तस्य वा, अधिकरणे भक्षितं भोजनमोदनस्य विप्रस्य वा, अधिकरणवाचिनः क्तस्य कर्त्तरि कर्मणि चोभयादपि षष्ठी, कर्म्मणि भक्षित ओदनो भवता । एवमन्येषामपि अविवक्षितकर्मकादित्यर्थः ॥२१॥

४. ब-श्लिष इति अस्यायमर्थः । ५. ब-यदा । ६. ब-अकर्मास्त० ।

[1]सकर्मकद्वारेण एभ्यः कर्त्तरि करणे[2] भावेषु[3] क्तो विहित एवास्ति। यदा पुनरेते उपसर्गवशात्[4] सकर्मका भवन्ति तदाप्येभ्यः कर्त्तृकर्मभावेषु क्तः स्यादित्यर्थः। कर्त्तरि यथा—आश्लिष्टः[5] कन्यां देवदत्तः; कर्मणि यथा—आश्लिष्टा कन्या देवदत्तेन[6]। [7]यथाश्लिष्यादिभ्यो भावे कर्म्मणि कर्त्तरि तथारम्भेऽपि क्तः स्यात्—आरम्भार्थः आदिकर्म्मणि, प्रकृतः कटं भवान्, प्रकृतो भवता। शेषेभ्यः कर्मणि क्तः स्यात्—पठितो ग्रन्थोऽनेनेत्यादि ॥२८॥

अनन्तरविधेयोऽस्य सर्वस्मादपि कर्त्तरि।
बहु घञादयो भावे केऽपि तेष्वपि कारके ॥२९॥

अस्यार्थः[8]—अस्येति पूर्वोक्तप्रत्ययस्य, अनन्तरविधेयः[9] क्तवतुरतीते काले विधेयः[10], सर्वस्मादपि गत्यर्थादेरन्यतश्च धातोः कर्त्तरि क्तवतुः[11] भवति, यथा—ग्रामं गतवानिति[12]। बह्विति[13]—घञ्, युट्, क्ति, आनि, नि, णिन्, अङ्, डु, क्यप्, य, यु, वुञ्, क्विप्, औ, उण्, अल्, कि, अथु, नङ्[14], एते [15]ऊनविंशतिप्रत्यया बहु बाहुल्येन[16] तावद्भावे भवन्ति, भावः पाकः इत्यादिषु[17] घञ्। भवनं युट्[18], भूतिः क्तिः[19], ग्लानिः निः[20], भवनिः अनिः[21], भावभाषी णिन्[22], जरा अङ्[23] इत्यादि। केऽपीत्यादि—तेषु घञादिषु केऽपि[24] प्रत्ययाः[25] घञ् युट् अल्[26] क्तिः क्यप् क्विप् क कि अङ इत्येते

---

१. ब-अकर्म्मव०। २. ब-कर्म्मणि। ३. ब-भावेदु।
४. ब-उपसर्गविशेषसम्बद्ध०। ५. ब-आश्लिष्टां।
६. ब-आश्लिष्टं देवदत्तेन देवदत्तस्य वेत्यधिकः पाठः।
७. ब-यथा····· त्यादीति सम्पूर्णोऽयं पाठो न वर्त्तते।
८ ब-पदमिदं न दृश्यते। ९. ब-ऽभिधेयः। १०. ब-क्तवतूरन्तरभिधेयः।
११. ब-पदमिदं न दृश्यते। १२. ब-गतवानित्यर्थः। १३. ब-वह्नि इत्यादि।
१४. ब-एतेषां क्रमस्त्वत्थम्—घञ् युर् क्ति निः अति, णेच अङ अ क्यप् य यु वुञ क्विप इडा अल कि अथु नङ। (सर्वोऽयमशुद्धः पाठः)।
१५. अ, ब-उ२०। १६. अ-बहुवाल्येन।
१७. अ-इत्यादि। केऽपीत्यादि। १८. ब-युट् भवनम्।
१९. ब-क्तिः भूतिः। २०. ब-पदमिदं न वर्त्तते।
२१. ब-अनि भवतिः। २२. ब-णच व्यवभाषी।
२३. ब-अङ जरा। २४. ब-पदमिदं न दृश्यते।
२५. ब-पदमिदं न दृश्यते। २६. ब-अला।

[1]नवप्रत्ययाः कारके भवन्ति—भुज्यत इति भोगः, पच्यत इति पाकः[2], इत्यादिषु कर्मणि घञ्; जीर्य्यते अनेनेति जारः, म्रियते [अनेन] मारः[3] इत्यादिषु करणे घञ्; उपेत्याधीयते यस्मादित्युपाध्यायः इत्यपादाने[4] घञ्; आध्रियते ऽस्मिन्नित्याधारः[5] इत्यादौ[6] अधिकरणे घञ्; अश्यते इत्यशनमित्यादिषु[7] कर्मणि युट्[8]; पीयतेऽनेनेति [9]पानमित्यादिषु करणे युट्[10], सम्प्रदीयते यस्मै इति[11] सम्प्रदानमिति सम्प्रदाने युट्; आदीयते यस्मादित्यादानम्[12] [13]इत्यपादाने युट्; स्थीयते [14]ऽस्मिन्निति स्थानम् [15]इत्यधिकरणे युट्; भुज्यत इति भुक्तिः[16], मुच्यते [इति] मुक्तिः[17] [इत्यादिषु] कर्मणि क्तिः[18]; ध्रियतेऽनया धृतिरित्यादिषु करणे, प्रक्रियते[19] ऽस्यामिति प्रकृतिः[20] इत्यादौ अपादाने, सम्भवन्ति[21] अस्यामिति[22] सम्भूतिरित्यादावधिकरणे क्तिः[23]; प्रभवन्ति [24]अस्मादिति प्रभवः [25]इत्यपादाने अल्[26], शेरतेऽस्यामिति[27] शय्या [28]अत्राधिकरणे क्यप्। [29]परिषीदन्ति [30]अस्यां परिषत् अधिकरणे क्विप्, [31]आयुध्यतेऽनेनेति [32]आयुधं करणे कः, प्रश्नाति [33]अस्मिन्निति प्रश्नः [34]अधिकरणे कः, निधीयते[35] इति निधिः कर्मणि किः, उपाधीयते विशिष्यते ऽनेनेति उपाधिः[36]

---

१. ब-दृश०।
२. ब-उदाहरणमिदं न दृश्यते।
३. ब-उदाहरणमिदं न दृश्यते।
४. अ-इत्यादौ अपादाने।
५. ब-अध्रियन्ते अवतिवृत्त्यस्मिन्नित्याधारः।
६. ब-पदमिदं न दृश्यते।
७. ब-अस्यत इत्यसनमितित्यादिषु, अ-अश्यते अशनम्।
८. ब-कि यद (?)
९. ब-पानः, अ-यानम्।
१०. ब-पदमिदं न वर्त्तते।
११. ब-पदमिदं न वर्तते।
१२. ब-अपादीयते यस्मादिति अपादानम्।
१३. ब-इत्यापादाने, अ-इति पदं न वर्त्तते।
१४. ब-यस्मिन्।
१५. अ-इति पदं न वर्त्तते।
१६. अ-भुज्यते मुक्तिः।
१७. ब-उदाहरणमिदं न दृश्यते।
१८. ब-द्वेऽपि पदे न दृश्येते।
१९. ब-प्रक्रुयते।
२०. अ-प्रकृया (?)।
२१. ब-सम्भवत्य०।
२२. ब-० मितिसम्भूदितिरिव्या०।
२३. ब-पदमिदं न दृश्यते।
२४. ब-प्रभवत्यस्मा०।
२५. ब-इत्यापादाने, अ-इति पदं नास्ति।
२६. ब-पदमिदं न वर्त्तते। २७. अ-इति पदं न वर्त्तते। २८. ब-अत्रेति पदं न वर्त्तते।
२९. ब-इत आरभ्य टीकागतोऽयं सर्वः पाठोऽस्मिन् क्रमेऽवर्त्तमानः। प्रकृतकारिकायाः क्रमाङ्कस्तु तत्र२४ वर्त्तते। अनुपलब्धोऽयं टीकागतपाठस्तु तत्र२३ कारिकायां लभ्यते।
३०. ब-अस्मिन्निति। ३१. ब-अयुध्य०। ३२. ब-आयुधः।
३३. ब-तस्मिन्नि०। ३४. ब-इत्यधि०। ३५. ब-नियतेति०। ३६. ब-०रितिकरणे।

करणे किः, अवधीयते ऽस्मादित्यवधिः[1] अपादाने किः, उदकं निधीयते ऽस्मिन्निति उदनिधि[2] [3]इत्यधिकरणे किः, उपमीयतेऽनेनेत्युपमा[4] करणे अङ्। इत्यादि एवमादयः[5] करणे[6] भवन्ति ॥२९॥

इव कृद्भावे स्यात्तेन द्विवचनाद्यपि प्रायः।
सत्यामभिव्याप्तौ भावेऽर्थे विहिता कृताः ॥३०॥

अस्यार्थः[7]—सर्वस्यापि भावस्य[8] भावसिद्धमेकवचनम्[9] अस्त्येव यथोपदर्शितम्, [10]भावे कृतद्रव्यमिवस्यात् द्रव्यवद् भवति, तेन द्विवचनबहुवचने अपि[11] प्रतिपत्तव्ये—पाकः पाकौ:[12]पाकाः, स्थितिः स्थिती[13] स्थितयः, पचनं पचने[14]पचनानि इत्यादि। आदिग्रहणात्[15] कर्मादिष्वर्थेषु द्वितीयापि[16]—पाकं, पाकौ, पाकान्। पश्य प्राय[17] इति बाहुल्येन सत्यामपि कर्मविवक्षायां भावेऽर्थे विहिताः कृत्प्रत्ययाः भवन्ति[18]—सबलमादाय[19] देशान्तर[20] गच्छति ॥३०॥

एकः कर्त्ता क्रियानेका चेत्तदा पूर्वकालतः।
भावे क्त्वाणमुष्मिंस्तु तदर्था चेत्क्रिया परा ॥३१॥

अस्यार्थः[21]—[22]एकः भिन्नः [23]कर्त्ता क्रियाऽनेकेति द्वे वास्य

---

१. ब-अस्मादृश्यवधिरित्यपा०।
२. ब-०न्नित्युदधिकः
३. अ-इति पदं नास्ति।
४. ब-मीयत इत्युपमा उपमेति।
५. ब-घतादि एवमादयः।
६. अ-कारके।
७. ब-अस्यायमर्थः।
८. ब-स्वभाव०।
९. ब-०वचनान्नवदस्त्यैव वसेपदर्शितम्।
१०. ब-ये भावविहितकृत्प्रत्ययास्ते ते द्विवचन०।
११. ब-पदमिदं न दृश्यते। १२. अ-पाकः। १३. अ-स्थितिः।
१४. अ-पचने पचने, १५. ब-ग्रहणात्तु।
१६. अ-द्वितीयापि। १७. ब-पश्याप्राय इति, अ-प्रापो बाहु०।
१८. ब -भवन्तीति। १९. ब-शम्बलमा०
२०. ब-देशान्तर प्रतिगच्छति ॥२५॥ २१. ब-अस्यायमर्थः।
२२. ब-एभिन्नः। २३. ब-कर्त्तनिकेति द्वेवास्य०।

क्रियाश्चेत्तदा[1] पूर्वः[2] क्रियाकालो यस्य धातोस्तस्मात् परे भावे क्त्वा[3] णम् तुम् ख भुजो[4] भवन्ति—छित्त्वा रिपून् नरपतिरायाति[5], भावं भावं क्षणमिह जलबुद्बुदा[6] इव सम्पदो[7] विपद्यन्ते, स्वादुं[8] स्वादुं कारं भुङ्क्ते ॥३१॥

जुण्तृच्[9] प्रभृतयः सर्वे दृश्यन्ते कर्तृवाचिनः ।
शतृङानसावपि[10] क्वन्सुः सापेक्षाः क्रियान्तरे ॥३२॥

अस्यार्थः[11]—शतृङानसौ[12] क्वन्सुश्च[13]—एते क्रियान्तरमपेक्षन्ति ।[14] ओदनं पचन्[15] सूपकारो गायति पचमानो वा ॥३२॥

कृतो धात्वर्थसम्बन्धे स्युः कालान्तरवाचिनः ।
तद्धितास्त्यादयो ऽप्येवमूहनीयाः प्रयोगतः ॥३३॥

अस्यार्थः[16]—धातूनां[17] सम्बन्धे विशेष्यविशेषणलक्षणे स्वं कालं त्यक्त्वा विशेषणानि कृत्प्रत्यया विशेष्यस्य धात्वर्थ[18] काले साधवो भवन्ति । अग्निष्टोमयाजी[19] पुत्रो[20]ऽस्य जनिता, कृतः पटः श्वो[21] भविता । तद्धितो यथा—गोमानासीत्[22] भविता वा[23] इत्यादि । इति कृदुपदेशः[24] ॥३३॥

यत्रार्थेनाभिधीयन्ते त्यादिप्रभृतयश्च ते ।
सोऽनुक्तस्तत्र कर्मादौ द्वितीयाद्या विभक्तयः ॥३४॥

---

१. अ-द्विवक्यः क्रियाचेत्तदा ।
२. ब-पूर्वकालो क्रिया० ।
३. ब-क्त्वा ।
४. ब-०मिश्रो ।
५. ब.निपून् जित्वा नमयतिरायाति ।
६. अ-बुद्बुद इव ।
७. अ-सम्पविपद्यन्ते ।
८- ब-पदमिदं न दृश्यते ।
९. अ-तृच ।
१०. अ-० नशा० ।
११. ब-पदमिदं न दृश्यते ।
१२ अ-शतृ ङ आनशौ ।
१३. ब-क्वन् सु च ।
१४. ब-० पेक्षन्ते । भवन्तीत्यधिकस्तत्र ।
१५. ब-उदनपच ०
१६. ब-अस्यायमर्थ : ।
१७. ब-सम्बन्धविशेष्यविशेषणलक्षण ० ।
१८. ब-धात्वर्थस्य ।
१९. अ-० पाजी, ब-० पायी ।
२०. ब-पुत्राष्ठ्यननिता (?) ।
२१. ब-स्वो ।
२२. ब-० सीतु।
२३. ब-भविष्यति देवदत्ते इत्यादि यथा ग्रामं जगाम ॥२९॥
२४. ब-प्रकरणसमाप्तिसूचकं वाक्यमिदं न दृश्यते ।

अस्यार्थः[१]—[२]त्यादितव्यादितद्धितसमासा यस्मिन्नर्थे क्रियन्ते स अनुक्तस्तत्रानुक्ते द्वितीयाद्याः सप्तम्यन्ता विभक्तयो भवन्ति । यथा—घटं करोति देवदत्तः, घटःक्रियते देवदत्तेन वा ॥३४॥

द्वितीया कर्मणि प्रोक्ता तृतीया कर्त्रृकारके ।
करणे च भवेत्सैव चतुर्थी सम्प्रदानतः ॥३५॥

अस्यार्थः[३]—पूर्वस्मात् षष्ठ्यनुवर्त्तते । कर्मकर्त्रोरनुक्तयोः कृदन्तानां प्रयोगे षष्ठी[४] भवति[५], ओदनस्य[६] पाचकः पक्ता वा; कटस्य कारकः[७] कर्त्ता वा । वुण्तृचोः[८] कर्त्तर्यभिधानाद् अनुक्तं कर्म । कर्त्तरि यथा[९]—भवतः शायिकाः[१०], भवतः[११] आशिकाः[१२], [१३]वुञभावे भवतीत्यतः[१४] कर्त्तानुक्तः ॥३५॥

पञ्चमी स्यादपादाने षष्ठी सम्बन्धमात्रके ।
कर्मकर्त्रोः क्रियायोगे द्वयोः प्राप्तौ न कर्त्तरि ॥३६॥

अस्यार्थः[१५]—द्वयोरिति प्रस्तुतयोः कर्मकर्त्रोरेकस्मिन्[१६] प्रयोगे उभयप्राप्तौ सत्यां कर्त्तरि षष्ठी[१७] न स्यात्, पाचयिता सूपकारेणौदनस्य देवदत्तः, दोहयिता गौः पयो [१८]गोपालेन गृहस्थः, कारयिता कटस्य देवदत्तेन[१९] यज्ञदत्तः[२०] इत्यादि । [२१]कृद्योगे सति कर्मणि च द्वयोः कोऽर्थः ? उभयत्र षष्ठ्यां प्राप्तौ कर्त्तरि न स्यात्, कर्मणि स्यादित्यर्थः ॥३६॥

वा घञादेरकाकारे द्वयोरपि भवेदियम् ।
कृत्यानां न द्वयोरेवं वाच्ये कर्त्तरि केवले ॥३७॥

---

१. ब-पदमिदं न दृश्यते ।
२. ब-द्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तम्यः, यथा—घटं करोति ॥२६॥
३. ब-पदमिदं न दृश्यते । ४. अ-पष्टी ।
५. ब-कर्म्मणीत्यधिकः पाठः । ६. ब-उदनं पाकः० ।
७. ब-घटस्य कारः कः । ८. ब-०तृचौ । ९. ब-यथा ।
१०. ब-शायिका । ११. ब-भवता । १२. ब-आशिक्या ।
१३. ब-ब्रुञ० । १४. ब-भवति इत्यनुक्तः कर्त्ता ।
१५. ब-पदमिदं न दृश्यते । १६. ब-इत आरभ्य पयो—पर्यन्तः पाठस्तु न दृश्यते ।
१७. अ-षष्टी । १८. ब-इतः प्राक् सम्बन्धयोगः इत्यधिकः पाठः ।
१९. अ-देवदत्तः । २०. अ-पदमिदं न दृश्यते ।
२१. ब-इत आरभ्य सम्पूर्णोऽयं पाठः न दृश्यते ।

अस्यार्थ.[1]—द्वयोः प्राप्तौ कर्त्तर्य्यनुमीयते[2]। घञादेरिति—घञ् युट् क्ति[3] अल् अच्[4] प्रभृतय उच्यन्ते[5]। एषां प्रयोगे सति उभयप्राप्तौ कर्त्तरि वा षष्ठी[6] स्यात्[7]—आश्चर्यो गवां दोहः पयो[8] गोपालकेन[9] गोपालकस्य[10] वा। साधय[11] खलु[12] पयसः पानं राजहंसेन राजहंसस्य वा, [12A]विचित्राकृतिः सूत्रस्य[13] पाणिनिना[14] पाणिनेर्वा[15]। अकाकार[16] इति—अकार[17] इयादेशसम्बन्धो [18]ऽनुगृह्यमाणो वुञभावविहित एव गृह्यते—अकाकारी स्त्री[18]। तत्रो[20]भयप्राप्तिरिति—अकार[21] इति—एषां[22] प्रयोगे द्वयोरपि कर्त्तृकर्म्मणोरियं षष्ठी[23] भवेत्—पाचिका सूपकारस्य, उदभेदि ओदनस्य[24], अका[25] काष्ठस्य विप्रस्य, चिकीर्षा[26], कटस्य देवदत्तस्य, ओदनस्य[27] सूपकारस्य। द्वयोरपि कर्त्तृकर्मणोरनुक्तयोः कृत्यानां प्रयोगे षष्ठी न[28] भवति उभयप्राप्तौ सत्याम्—नेतव्यो नयनीयो भारो ग्रामं देवदत्तेन। एवमन्यदप्यूहनीयम्। [28]वाच्येत्यादि—यत्र कृत्यानां[30] कर्त्ता केवलानुक्तो[31] भवेत् न तत्र[32] कर्म, षष्ठी कर्त्तरि वा भवति। कर्त्तव्यो[33] देवदत्तेन देवदत्तस्य वा कटः। एवं कृत्यानामपीत्यादि ॥३७॥

निष्ठो[34]दन्ताव्ययो घञ् तृण् शत्रानशक्वन्सुभिर्न।
सा भाविनी ना वुण् तस्मिन्केश्च योगाद्दणे णिनेः ॥३८॥

---

१. ब-पदमिदं न दृश्यते। २. ब-द्वयाप्राप्तौ न वर्त्तरि अनमीयते। ३. ब-क्तिः।
४. अ-अच। ५. ब-उच्यते। ६. अ-षष्टी।
७. ब-भवति। ८. ब-पयसो। ९. अ-गोपालेन।
१०. अ-पदमिदं न दृश्यते। ११. अ-साद्धव्यं, ब-साध। १२. अ-तु।
१२A. ब-विचाकृतिः। १३. अ-पदमिदं न दृश्यते। १४. अ-पाणिना, ब-पाणिनि।
१५. अ-पाणिनो। १६. ब-अककार। १७. ब-अक ०
१८. ब-० नुगृह्यतां ना वुञभावगृहात एत गृह्यत। १९. अ-उदाहरणमिदं नोपलभ्यते।
ब पुस्तके तु 'भावविहितवेवरस्यसाहचर्य्यादेद्गृह्यते' इत्यधिकोऽत्र पाठः।
२०. अ-तत्रोपप्राप्ति ०। २१. ब-अकारच्चेति। २२. ब-एव।
२३. अ-षष्टी। २४. ब-उदनस्य उदमेदि। २५. अ-आक।
२६. ब-चिकोर्षो। २७. ब-उदनस्य। २८. ब-नेतिपदं न दृश्यते।
२९. ब-अत्र ३१ क्रमाङ्कः वर्त्तते। ३०. अ-पदमिदं न वर्त्तते।
३१. ब-केवल एवानुक्तो। ३२. ब-न कर्म तत्र षष्ठी।
३३. ब-कर्त्तव्य कटो। ३४. अ-निष्टो ०।

अस्यार्थः[1]—कर्म्मकर्त्रोः कृत्यप्रयोगे इत्यभिप्रसङ्गे[2] प्रतिषेधोऽयम्[3]। क्त क्तवतु उदन्त[4] इष्णु[5]मुच् तृण्[6] अव्यय इत्यादिभिर्भविष्यति, विहितेन इना[7] सम्बन्धेन च[8], वुण् तच्छीलकस्य[9] केः ऋणविषये णिनेश्च[10] योगात् कर्त्तरि कर्मणि[11]च [12] यथायोगं[13] प्राप्ता षष्ठी न[14] भवति। ग्रामं[15] गतः, ग्रामो गतः, तेन ग्रामं गतवानित्यादि[16] ॥३८॥

वा तु कर्त्तरि भावे क्ते शतृङा कर्मणि द्विषः।
ख्याञो यत्ने कृदाख्याते कृञश्चानुकृतौ तथा ॥३९॥

अस्यार्थः[17]—भावे[18] विहितस्य क्तप्रत्ययस्य योगे[19] कर्त्तरि[20] षष्ठी[21] वा भवति—कोकिलानां कूजितं मधुशब्दं मधुरं कोकिलैर्वा[22], हंसनां गतं हंसैर्वा[23]। [24]शतृङा क्तस्य प्रयोगे कर्मणि षष्ठी वा भवति—चौरस्य द्विषन्[25] चौरं द्विषनयम्[26]। कृञ् इत्यादि—[27]कृताख्यातयोः प्रयोगे प्रतियत्ने[28] गम्यमाने करोतेः षष्ठी वा भवति—सतो गुणानन्तराधानं[29] प्रतियत्नः। [30]कृतिनिष्ठादि पठित इह यथासम्भव[31] इष्यते - अङ्गानामुपस्कुर्वाणं यौवनं[32]युवन्मुदयति अङ्गानि वा[33], अङ्गानामुपस्कर्त्तुं[34] [35]यौवनमुदयते अङ्गानि वा। कृञश्चेत्यादि[36]—हरतेः करोतेश्चानुकरणे[37] ऽर्थे, तथेति[38] कर्मणि षष्ठी वा भवति—पितृमुखस्याहरति[39] कन्या भवति पितृमुखं वा, पितुरनुहरति[40] पोतः पितरं वा, अनुकरोति समुद्रस्य अनुकुर्वन् कोऽपि शोभते[41] समुद्रं वा ॥३९॥

---

१. ब-पदमिदं न दृश्यते। २. ब-० प्रसङ्गो। ३. अ-प्रतिषेधेयम्, ब-प्रषेधोयम्।
४. ब-उदत्त। ५. ब-इदमुच। ६. ब-बृणा। ७. अ-इनौ।
८. ब-सम्बन्धनवबुना। ९. ब-ताच्छीलिकस्ये। १०. ब-णिनैर्यो०।
११. ब-कर्मणि कर्त्तरि। १२. अ-चेतिपदं न दृश्यते। १३. ब-यथायोगप्राया।
१४. अ-नेतिपदं न वर्त्तते १५. ब-ग्राम। १६. ब-०नित्यर्थः ॥३२॥
१७. ब-पदमिदं न दृश्यते। १८. ब-भाव०। १९. ब-क्तस्य प्रयोगे।
२०. अ-पदमिदं न दृश्यते। २१. अ-षष्टी। २२. अ-उदाहरणमिदं न दृश्यते।
ब-कोकिलानां कुजितं०। २३. अ-उदाहरणमिदं न दृश्यते।
२४. अ-समग्रमिदं वाक्यं न दृश्यते। २५. अ-द्विषम् २६. अ-चौ० द्विषनयमिति न दृश्यते।
२७. अ-कृत्याख्या०। २८. ब-प्रयत्ने। २९. ब-०गुणान्तराधान०।
३०. ब-कृदिति०। ३१. अ-०सम्भावा। ३२. अ-भुवं नादयति।
३३. ब-च। ३४. अ-अङ्गान्युपस्कर्त्तुं। ३५. ब-योवनमु०।
३६. ब-कृञश्चेदित्यादि। ३७. अ-०श्चानुक्तकरणे। ३८. अ-तथाति०।
३९. ब-०स्याहरन्ती। ४०. ब-पितुरवहंठति। ४१. ब-भोभते।

स्मृतिर्हिंसार्थयोरेवं तृप्त्यर्थकरणोऽपि वा।
आधारे वर्त्तमाने च क्तः स्यात् कर्त्तृकर्म्मणोः ॥४०॥

अस्यार्थः[1]—स्मरणार्थस्य[2] हिंसार्थस्य धातोः प्रयोगे[3] कर्म्मण्येव षष्ठी[4] भवति—भर्त्तुः स्मरन्ती प्राणान् त्यजति भर्त्तारं वा[5]। तृप्त्यादि—तृप्त्यर्थस्य धातोः प्रयोगे करणे षष्ठी वा भवति--फलानां तृप्तः[6] फलैर्वा। आधारे ऽतीतकाले वर्त्तमाने च यः क्तो विहितस्तस्य [7]कर्त्तृकर्मणोरुभयोरपि भवति--यथा देवदत्तस्य गतो ग्रामः, भुक्त ओदनो देवदत्तस्य[8] ॥४०॥

आधारे सप्तमी ज्ञेया निमित्तात्कर्मयोगतः।
क्तस्य चेत्प्रकृतेर्व्याप्ये क्रियाचिह्नं तु यत्क्रिया ॥४१॥

अस्यार्थः[9]—क्रियाश्रयभूतः कर्त्ता[10] कर्म वा, आध्रियते ऽवतिष्ठते[11] ऽस्मिन्निति आधारः, य आधारस्तदधिकरणं, तच्चतुर्विधमधिकरणम्[12] [13]औपश्लेषिकादिभेदेन, तस्मिन् सर्वानुक्ते सप्तमी वाच्या—कटे[14] आस्ते इत्यादि। निमित्तादीत्यादि[15] प्रत्ययस्य प्रकृतेः[16] क्तान्तस्य व्याप्ये कर्मणि सप्तमी भवति—व्याकरणे अधीती छात्रः। क्रियेत्यादि—यस्योक्तस्य कारकस्य क्रिया क्रियान्तरस्य चिह्नं लक्षणं भवति तस्मात् सप्तमी[17] भवति—गोषु दुह्यमानासु आगत इत्यादि[18] ॥४१॥

ततश्चानादरे षष्ठी[19] अपि निर्धारणे तथा।
कर्मप्रवचनीये च द्वितीया समयादिभिः ॥४२॥

अस्यार्थः[20]—यस्य क्रिया[21] क्रियान्तरस्य चिह्नं भवति तस्मादनादरे

---

१. ब-अस्यायमर्थः। २. अ-०णार्थहिंसा०। ३. अ-पदमिदं न दृश्यते।
४. अ-षष्टी। ५. अ-कर्त्तुः स्मरन्तं प्राणान् त्यजन्ति कर्त्तारमपि वा।
६. अ-प्राप्तः। ७. ब-कर्तृ०। ८. ब-भुक्तं देवदत्तं उदनस्य ॥३४॥
९. ब-आधार इत्यादि अस्यायमर्थः १०. अ-पदमिदं नास्ति।
११. ब-०ऽधिस्तिष्ठत। १२. ब-पदद्वयमपि नास्ति।
१३. ब-अपश्लेषिकादिभद्रेन। १४. अ-कटेन।
१५. अ-प्रत्ययप्रत्ययस्य; ब-निमित्तादि त्यादि०। १६. अ-प्रकृते।
१७. ब-०सप्तिसप्तनी। १८. ब-इत्यर्थः ॥३५॥
१९. अ-षष्टी। २०. ब-अस्यायमर्थः। २१. अ-क्रियया।

षष्ठी भवति सप्तम्यपि—वदति पोते पुष्करिणी[1] गच्छति[2] वदतः पोतस्य वा। यतः समुदायात् जात्यादिभिरेकैकशो निर्द्धार्यते[3] पृथक्क्रियते तन्निर्धारणम् तस्मात्तथैव[4] षष्ठी[5]सप्तम्यौ भवतः[6]—पुरुषाणां[7] क्षत्रियः शूरः[8] पुरुषेषु वा। कर्मेत्यादि—कर्मक्रियां प्रोक्तवन्तः[9] कर्मप्रवचनीयाः[10] अर्थविशेषेषु परिभावेषु[11] वर्त्तमानाः[12] अभि परि आङ्[13] एते, पूर्वाचार्यप्रसिद्धसंज्ञाः, एषां को वा कस्मिन् प्रवर्त्तते[14] इत्युच्यते[15]—लक्षणेत्थम्भूतेष्टेत्यादिषु[16] चेति भावः, पर्वतलक्षणे यथा[17]—[18]पर्वतमभिद्योतते विद्युद् इत्यादि। समयानिकषाहाधिगन्तरान्तरेण योगे द्वितीया—समया ग्राममित्यादि ॥४२॥

उपर्यादिभिरप्यस्तैस्तं संतैरुभयादिभिः।
प्रतिनिधौ परीवर्त्ते पञ्चमी प्रतिना युतात् ॥४३॥

अस्यार्थः[19]—उपरि अधस् अधि एभिः कृत्तद्धितवचनैर्युक्ताल्लिङ्गात्[20] द्वितीया भवति—उभयतो ग्रामं कुटुम्बभरो[21] वसति[22]। प्रतिनिधिर्मुख्यसदृशः। प्रतिनिधौ[23] परीवर्त्ते[24] चार्थे प्रतिशब्देन[25] युक्तात् पञ्चमीषु[26] क्तः[27] भवति—अभिमन्युरर्जुनतः[28] प्रतिमुख्यस्यार्जुनस्य[29] सदृश इत्यर्थः। परीवर्त्ते तावत्—माषान्[30] असौ[31] तिलेभ्यः प्रतियच्छति[32], माषस्य ददाति तिलान् ग्रहीतु[33]मित्यर्थः ॥४३॥

---

१. ब-पुष्करणीं, अ-पुष्करिणीं
२. ब-गछति।
३. अ-ता इत्यादिभिरेकैकतोभिधार्यते।
४. ब-तस्मादर्थे।
५. अ-षष्टी।
६. अ-स्तः।
७. ब-पुरुणाणां।
८. ब-शूरतमः।
९. ब-कर्मक्रियाप्रयोक्तः।
१०. ब-कर्मणिवनीयः।
११. ब-०शेषपारिपाषेषु।
१२. अ-वर्त्तमान।
१३. ब-अनु उप इत्यधिकः पाठः।
१४. ब-प्रवर्त्तमाने।
१५. ब-पाठोऽयं न दृश्यते।
१६. ब-लक्षणंवीप्सेत्यंभूतेष्विम्पादिषु।
१७. अ-तथा, ब-तावत्।
१८. ब-उदाहरणमिदं न दृश्यते।
१९. ब-अस्यायमर्थः।
२०. ब-०लिङ्गां।
२१. ब-कुटुम्बो, अ-कुटुम्बरो।
२२. ब-गच्छति।
२३. ब-प्रतिनिधो।
२४. ब-प्रत्तिवर्त्त।
२५. ब-प्रतिशब्दे योगेन।
२६. अ-पञ्चमो।
२७. अ-पदमिदं न दृश्यते।
२८. ब-०र्ज्जुणतः।
२९. ब-०र्ज्जुणस्य।
३०. ब-माषाब्द।
३१. अ-अस्मै।
३२. ब-अतिगच्छति।
३३. ब-पहीतु० ॥४३॥

अधिना सप्तमी साम्ये उपेनाधिविनापि सा।
तृतीया पञ्चमी चैव पृथक् नानाप्रयोगतः ॥४४॥

अस्यार्थ.[1]—अधिशब्देन[2] युक्तात् स्वाम्यर्थे[3] सप्तमी भवति[4]—अधिभुवि रामः, अधिरामे भूः[5], अधिप्रदत्तेषु पाञ्चालाः[6]। उपेनेत्यादि—अधिकार्थेन [7]उपशब्देन युक्तात्[8] सप्तमी भवति—[9]उपखार्यां द्रोणः चतुर्भिद्रोणैश्चत्वारिद्रोणाधिका भवति तस्याः सप्तमी भवति[10]। तृतीयेत्यादि—पृथक् देवदत्तेन नानादेवदत्तेन ॥४४॥

स्तोकादेः करणे सत्त्वाद् ऋणाद्धेतोर्गुणान्न वा।
यदर्थं किञ्चिदेवास्य चतुर्थी सम्प्रदानतः ॥४५॥

अस्यार्थः[11]—स्तोकः[12] अल्प कृच्छ्र कतिपय एते स्तोकादयः, एभ्यो—ऽसत्त्व[13]वाचिभ्यो धर्ममात्रवर्त्तिभ्यः करणे पञ्चमी भवति—स्तोकान्मुक्त[14] इत्यादि। ऋणाद्धेतोरित्यादि—करणभूताद् ऋणात्[15] पञ्चमी भवति, हेत्वर्थे तृतीयाऽपवादः[16]—सहस्राद् बद्धः[17], शतादधीनः[18]। गुणान्न वेति—द्रव्याश्रयो गुणः, गुणाद् हेतुभूतात्[19] पञ्चमी भवति वा[20]—मोहाद् बद्धो लोकः, मोहेन वा इत्यादि। यदर्थमित्यादि[21]—किञ्चिद् [22]वस्तुक्रियार्थं यत्र [23]चतुर्थी सम्मता—यूपाय दारुः, कुण्डलाय हिरण्यम् इत्यादि ॥४५[24]॥

यस्मै कुप्यति तस्माच्च नम आदिभिरप्यसौ।
व्याप्येऽनध्वनि चेष्टायां गत्यर्थानां विभाषया ॥४६॥

---

१. ब-अधिना सप्तमीत्यादि। २. ब-अधिशब्द। ३. ब-कर्म्यर्थे।
४. अ-पदमिदं न दृश्यते। ५. ब-पाठस्यायं क्रमः—तृतीयेत्यादि अधिभुविराम भूः।
६. अ-०या बालाः, ब-पञ्चालाः। ७. ब-रूप०। ८. अ, ब-युक्ता।
९-१० अङ्कयोर्मध्यगतः पाठस्तु अपुस्तकेऽनुलब्धः। ब-पुस्तकेऽपि 'उपावार्यो द्रोणः चतुभि-द्रोणैश्चवारि०' इतिरूपेणाशुद्धोऽयं पाठः।
११. ब-स्तोकादेरित्यादि। १२. अ-असकृत्०। १३. अ-असत्य०।
१४. ब-०मुक्तिरित्यादि। १५ ब-पदमिदं न दृश्यते। १६. ब-०तृतीयापि।अपवादः।
१७. अ-यः सहस्रद्विशतादवधिनः। १८. अ-उदाहरणमिदं नोपलभ्यते। १९ अ-गुणान्वितात्।
२०. अ-वेतिपदं न दृश्यते। २१. अ-वाक्यमिदं न दृश्यते। २२. ब-भूतार्थयदर्थं।
२३. न तु। २४. ब-४६।

अस्यार्थः[1] —देवदत्ताय कुप्यति, देवदत्ताय मुह्यति इत्यादि । नमः स्वस्ति स्वाहा स्वधा अलं वषट् —एते नम आदयः । एभिर्युक्ताद् असौ चतुर्थी—नमो देवाय । गत्यर्थानां धातूनां व्याप्ये कर्मणि अवर्जिते चेष्टायां परिस्पन्दे चतुर्थी वा भवति । मनो धीतोर्न वा, वर्जितात्कर्मणि षष्ठी[2] भवति । अनादरकुत्सादि-गम्यते । पक्षे द्वितीया[3]। मन्येतर्जत्यादि कुत्सायां न भवति, अस्मान् दृषदं मन्ये इत्यादौ । एवं नवादौ न नत्वा नावं मन्ये इत्यादि ॥४६॥

विना युक्ताद् द्वितीया सा पञ्चमी च शेषतः ।
तृतीया लक्षणे हेतौ सहार्थेन च युक्ततः ॥४७॥

अस्यार्थः[4]—[5]विनायुक्तात् सा द्वितीया, पञ्चमी[6], विशेषतः तृतीया च । विना वर्षति देवो वातम्, विना वातात्, विना वातेनेत्यादि । लक्षहेतौ च[7] तृतीया भवति । लक्ष्यते येन तल्लक्षणम् । लक्षणेनानुमीयते—न ब्राह्मणः[8], पुस्तकवान्[9] छात्र इत्यादि[10] । सहार्थेनेत्यादि—क्रियागुणद्रव्यैः सहभावः सहार्थः । सहार्थेन युक्तकलिङ्गात्[11] तृतीया भवति—पुत्रेण सहागतः[12] । एवं समं साकं सार्द्धम् अमा प्रभृतयः ॥४७[13]॥

मन्यतेरप्यनावादौ नादरो यत्र गम्यते ।
पञ्चमी च द्वितीया च ऋते युक्तादियं द्वयम्[14] ॥४८॥

॥ इतिकरणोद्देशः[15] ॥

षष्ठी स्याद्धेतुना सर्वा हेत्वर्थैः सर्वनामतः ।
कर्मादीनां विवक्षाभिरूहनीयाः प्रयोगतः ॥४९॥

---

१. ब-पुस्तके तु सटीकाया कारिकाया अभाव एव । २. अ-षष्टी । ३. अ, ब-मने ।
४. ब-पदमिदं न दृश्यते । ५. अ-विना……तृतीया चेति पाठः न दृश्यते ।
६. ब-विना-इत्यधिकः पाठः । ७. अ-पदमिदं न दृश्यते । ८. ब-नाब्राह्म ।
९. ब-पुस्तक । १०. ब-इत्यर्थः । ११. ब-०युक्तात् ।
१२. ब-सहगतः । १३. ब-॥४०॥
१४. अ-अत्र टीका न वर्तते । ब-सटीकायाः कारिकाया अभाव एव ।
१५. ब-वाक्यमिदं न दृश्यते ।

अस्यार्थः[१]—षष्ठीति[२]—तद्यथा[३]—[४]हेतुशब्देन युक्ताल्लिङ्गात् षष्ठी[५] स्यात्[६]—अन्नस्य हेतोर्वसति सेना[७]। सर्वनाम इत्यादि --सर्व[८]नामहेत्वर्थेन शब्देन युक्तात् लिङ्गात्[९] सर्वविभक्तयो[१०] भवन्ति[११]—को हेतुः, कं हेतुम्[१२], केन हेतुना, कस्मै हेतवे[१३], कस्माद्हेतोः[१४] इत्यादि[१५]। कर्मादीनामित्यादि-प्रयोगतः अभिधानात् कर्मकरणसम्प्रदानापादानसम्बन्धाधिकरणानां[१६] विवक्षया[१७] वक्तुमिच्छया[१८] द्वितीयादयोऽपि[१९] ऊहनीया[२०] इत्यर्थः। गन्तुं[२१] व्यवहरति इत्यादि ॥ इति कारकोद्देशः[२२] ॥४९॥[२३]

समस्यन्ते द्वितीयाद्या यत्र नामपदैः परैः।
स तत्पुरुष इत्युक्तो यत्परं तत्परं बहु ॥५०॥

अस्यार्थः[२४]—कृष्णं श्रितः कृष्णाश्रित इत्यादौ द्वितीया समस्यते। अहिना दष्टः अहिदष्टः इति कर्त्तरि तृतीया समस्यते। करणे तृतीया यथा—नखैर्भिन्नः[२५] नखभिन्नः। देवाय देयं देवदेयमित्यादौ चतुर्थी समस्यते। वृकाद्-भयं वृकभयमित्यादौ पञ्चमी समस्यते। राज्ञः पुरुषः राजपुरुषः इत्यादौ षष्ठी समस्यते। अक्षेषु शौण्डः अक्षशौण्डः इत्यादौ सप्तमी समस्यते। बह्विति प्रायश[२६] इत्यादि—तेन तत्पुरुषोऽस्मिन् क्वचित्, एवं पूर्वमपि नियत इति, तद्यथा द्वितीयासमासः—प्राप्तो जीविकां प्राप्तजीविकः, इत्यादयो द्वितीयादिभिः समस्यन्त इति भावः ॥५०॥

विशेषणं विशेष्येण एकार्थं यदि तद्द्वयम्।
स कर्मधारयस्तस्मिन् प्रायः पूर्वं विशेषणम् ॥५१॥

---

१. अ, ब-पदमिदं न दृश्यते। २. अ-षष्टीति, ब-षष्ठीत्यादि।
३. ब-तथ्यथा। ४. ब-ि तुशब्देन लिङ्गात्। ५. अ–षष्टी।
६. ब-पदमिदं न दृश्यते। ७. ब-पदमिदं न दृश्यते। ८. ब-सर्वनाम्नो०।
९. ब-पदमिदं न दृश्यते। १० अ-सर्वा विभक्तिर्। ११. अ-भवति।
१२. ब-किं हेतुं। १३-१४. अ-द्वेऽप्युदाहरणे न दृश्येते।
१५. ब-पदमिदं न वर्त्तते। १६. अ-०न्धाधाराणां। १७. ब-पदमिदं न वर्त्तते।
१८. ब-वित्तुमिक्षया। १९. ब-द्वितीयाविभक्तयो।
२०. अ-उहनीया, ब-दुहनीया। २१. ब-गतं। २२. ब-वाक्यमिदं न दृश्यते।
२३. ब-॥४१॥ २४. ब-सटीकेयं कारिकान दृश्यते।
२५. अ-पदमिदं न दृश्यते। २६. अ-प्रायस।

अस्यार्थः[1]—विशेष्यते[2] ऽनेनेति विशेषणम्[3] । विशेष्यते एतदिति विशेष्यम्[4] । विशेषणं[5] नाम[6] विशेष्येण[7] नाम्ना परपदेन समस्यते । विशेषणं विशेष्यं च यदि[8] द्वे एकाभिधेये[9] भवतः एकस्मिन् वाक्ये वर्तेत[10] इति यावत्—नीलं च तद् [11]उत्पलं च[12] नीलोत्पलमित्यादि ॥५१।[13]

तद्धितार्थे समाहारे उत्तरस्मिन् पदे परे ।
समासोऽयं द्विगुर्यत्र संख्या संख्येयवाचिभिः ॥५२॥

अस्यार्थः[14]—अत्र संख्या विशेषणं, संख्येयवाचिभिः[15] [16]परपदविशेष्यैः समस्यते । तद्धितार्थविशेष्यभूते[17] ऽभिधेये च समाहारे उत्तरपदे[18] परतः समासो द्विगु ज्ञेयः[19] । पञ्चानां[20] गर्गाणां[21] (भूतपूर्वे गौः[22]) पञ्चगार्ग्य-रूपः ।[23] एवं[24] पञ्चकपालं हविः ॥५२॥[25]

उभौ तत्पुरुषावुक्तौ तेन कार्यं तदाश्रयम् ।
लक्षता लक्षलक्ष्येषु लक्षणेक्षणदक्षिणा ॥५३॥

अस्यार्थः[26]—द्वौ द्विगुकर्मधारयौ तत्पुरुषावुक्तौ[27], तेन तत्पुरुषमाश्रित्य यत्कार्यविहितं[28] तदपि स्यात्—महाराजः[29] ॥५३॥[30]

---

१. अ-विशेषणमित्यस्यार्थ इत्यधिकः पाठः । ब-विशेषमित्यादि अस्यायमर्थः ।
२. ब-विशेषते । ३. ब-पदमिदं न दृश्यते ।
४. ब-समग्रमपीदं वाक्यं नोपलभ्यते । ५-६. ब-द्वेऽपि पदे न वर्त्तेते ।
७ ब-विशेषेण० । ८. ब-यद्वि । ९. ब-०मिधेयो ।
१०. ब-प्रवर्त्तेता । ११. अ-उत्पलं । १२. ब-चेति । १३. ब-॥४२॥
१४. ब-तद्धितार्थ इत्यादि अस्यायमर्थः । १५. ब-०वाचिनीः ।
१६. अ-परस्परविशे०, ब-परपदे विशेष्ये । १७. ब-०विशेषभूयतऽभि० ।
१८. ब-पदमिदं न दृश्यते । १९. ब-द्विगुर्वाचिः ।
२०. ब-परानां । २१. ब-गर्गानां ।
२२. ब-गीः । प्रकरणासम्बद्धोऽयमंशः प्रतीयते । २३. ब-पञ्चगार्गः रूपः ।
२४. ब-पदमिदं न दृश्यते । २५. ब-॥४३॥
२६. ब-उभावित्यादि अस्यायमर्थः । २७. ब-०विहितौ ।
२८. ब-०विहित । २९. ब-महारजः ।
३०. ब-॥४४॥

यत्रानेकं परस्यार्थे स बहुव्रीहिरुच्यते ।
सरूपे[1] यदि वा युद्धे दिशां नाम्नां विदिश्यति ॥५४॥

अस्यार्थः[2]—यत्रेति[3] । अनेकं द्वे बहूनि पदानि यत्रान्यपदार्थे[4] वर्त्तमानानि समस्यन्ते स समासो [5]बहुव्रीहिरभिधीयते । अभिप्रायस्त्वयम्[6]—प्रायः समानाधिकरणानामेव[7] पदानां वेदितव्यः । यथा—[8]प्राप्तमुदकं येन[9] स प्राप्तोदकः[10], [11]निर्जितोऽरिर्येन स निर्ज्जितारिर्वीरः इत्यादि । सरूप[12] इत्यादि । यत्र समस्यमानपूर्वे[13] द्वे पदे नाम्नी तत्र[14] गृहीत्वा तेन प्रहृत्यर्थद्वे ग्रहणोपाधिनिमित्ते[15] अन्यपदार्थे समस्येते[16] सोऽपि बहुव्रीहिर्भवति—केशेषु[17] केशेषु[18] गृहीत्वा[19] युद्धं प्रवृत्तं[20] केशाकेशि इत्यादि । दिशामित्यादि—यत्र दिशां द्वे नाम्नी [21]विदिशावाच्यायां समस्येते सोऽपि बहुव्रीहिर्भवति[22]—दक्षिणस्याश्च पूर्वस्याश्च [23]यदन्तरालं सा दक्षिणपूर्वादिक्॥५४॥[24]

इतरेतरयोगे च समाहारेऽपि चार्थयोः ।
स समासो भवेद् द्वन्द्वो[25] नाम्नोर्नाम्नां समुच्चये ॥५५॥

अस्यार्थः[26]—इतरेतर इति[27] । इतरेतरयोगे[28] समाहारे च[29] द्वयोश्चार्थयोः समस्यते[30] स[31] समासो द्वन्द्वो[32] भवति[33] । यत्र[34] इतरेतरयोगे द्वन्द्वो[35] ऽवयवप्रधान इति द्विवचनबहुवचने भवतः, परपदलिङ्गं च । [36]समाहारे च द्वन्द्वस्तिरोहितावयवभेदः[37], समुदायप्रधान इति समुदायस्यैकत्वाद्[38]

---

१. अ-स्वरूपे । २. ब-यत्रेत्यादि । ३. ब-पदमिदं न दृश्यते ।
४. ब-अन्यस्य पदस्यार्थे । ५. ब-वा भिधीयते ।
६. अ-अभिप्रायः प्रायः । ब-अभिधानात् प्रायः । ७. अ-समानाधिकरणसमानानामेव ।
८. ब-प्रासमु० । ९. काशिकायां तु-यमिति पाठः ।
१०. अ-प्रायोदकः । ब-प्राप्तोदको ग्रामः । ११. अ-निर्गतोऽरिर्येन स निर्गतारिरित्यादि ।
१२. अ, ब-स्वरूपे । १३. ब-समासे समाने । १४. ब-यत्र ।
१५. अ-ग्रहणहरणोपायनिमित्ते १६. अ-समस्यते । ब- समस्येते । १७. ब-शेषु ।
१८. ब-चेत्यधिकः पाठः । १९. इदमित्यधिकः काशिकायाम् । २०. ब-वृत्तं ।
२१. अ-दिशां वाच्यायां । २२. अ-पदमिदं नास्ति । २३. ब-र्य्यदेदन्तराख्यं ।
२४. ब-॥४५॥ २५. अ-द्वन्दो । २६. ब-पदमिदं न दृश्यते । २७. ब-इतरेतरेत्यादि ।
२८. अ-पदमिदं न दृश्यते । २९. ब-चार्थेयो । ३०. ब-समस्येत, अ-समस्यन्ते ।
३१. ब-पदमिदं न दृश्यते । ३२. ब-द्वंदसंज्ञो । ३३. ब-भवेत् ।
३४. अ-तत्र । ३५. ब-द्वंदे संबधप्रधान इति अवयवाश्रयो द्विवचन भवतः ।
३६. ब-समाहारस्तिरोहिता एव भेदः । ३७. ब-अत्र कारिकाङ्कस्तु ४६ वर्त्तते ।
३८. अ-समुद्दिश्यैकत्वादेक० ।

एकवचनं नपुंसकलिङ्गं[1] च भवति—स्त्री च पुरुषश्च[2] स्त्रीपुरुषाविमौ, स्त्री-पुरुषमित्यादि। [3]स्त्री च पुमांश्च नपुंसकं च स्त्रीपुंनपुंसकानि, स्त्रीपुंनपुंसकम् इत्यादि[4] ॥५५॥

तस्मिन्नल्पस्वरं पूर्वं प्रायो यच्चार्चितं द्वयोः।
यत्रासंख्या विभक्त्यादौ सोऽव्ययीभाव उच्यते ॥५६॥

अस्यार्थः[5]—यत्र[6] द्वन्द्वे द्वयोर्मध्ये यदल्पस्वरतरं यदप्यर्चितं भवति[7] प्रायस्तत्पूर्वं[8] निपतति—प्लक्षन्यग्रोधम्[9]। द्वयोरिति किम्? [10]शंखदुन्दु-भिवीणाः। प्राय इतिवचनात्—उदूषलमुशले[11], तण्डुलकिण्वम्[12] इत्यादि[13]। यत्रेत्यादि।[14] यस्मिन् समासे विभक्त्यादावर्थे[15] वर्त्तमानसंख्यमव्ययं[16] समस्यते सो[17] ऽव्ययीभावः समासोऽभिधीयते। तथापि बाहुल्यव्यवहारतया-तिशययोगिष्वेवार्थेष्वव्ययीभावः[18] समासो दृश्यते—[19]स्त्रीष्वधिकृत्य कथा[20] प्रवृत्ता अधिस्त्रि इत्यादि ॥५६॥[21]

षष्ठीतत्पुरुषे राजपुरुषाभ्यां सभा परा।
क्लीवे शालाभिधेयेऽपि छायाबाहुल्यपूर्विका ॥५७॥

---

१. ब-नपुंसका भवति। २. ब-स्त्रीतिपदं नास्ति।
३. ब-स्त्री च पुमाश्च न तस्मिनित्यादि ॥ ४. ब-अत्र कारिकाङ्कस्तु न दृश्यते।
५. ब-पदमिदं न दृश्यते। ६. ब-तत्र। ७. ब-पदमिदं नोपलभ्यते।
८. ब-०तत्पूर्व०। ९. ब-प्लक्षण्येन्य०। १०. अ-सत्यं दुन्दु०।
११. ब-०मुशलो। ०मुशलम् इति काशिकायाम्। १२. अ-तण्डुलकारव, ब-तण्डलकि एव।
१३. ब-अत्र कारिकङ्काः ४७ वर्त्तते। १४. अ-पदमिदं न वर्त्तते।
१५. ब-०दावर्थ समस्यते। १६. ब-बहुष्वर्थेषु बहुष्ववयं।
१७. ब-स·····धीयत इतिपाठस्त्वनुपलब्धः।
१८. ब-०व्यवहारे तथा व्यतिशयोगीष्वपरिमितेषु वार्थेष्वव्ययीभावः।
१९. अ-स्त्रियमधि०। २०. ब-तथा। २१. ब-कारिकाक्रमाङ्कस्तु ४८ वर्त्तते।
किन्तु 'अ' पुस्तके ऽत्र यो व्याख्याभागो ऽग्रेऽपि दृश्यते स तु अग्रिमकारिकया सम्बद्धः। अतोऽत्र न तस्य पाठः समीचीनः।

अस्यार्थः[1]—अराजतः[2] अमनुष्यशब्दस्य[3] वाचिनश्च परः [4]षष्ठी-तत्पुरुषान्तः समासः, सभाशब्दो नपुंसकलिङ्गो[5] भवति, [6]उत्तरात्र अशालार्थ इतिप्रतिषेधात् इह सभा[7] गृहार्थो[8] गोष्ठार्थश्च[9] गृह्यते। अराजशब्दा-त्तावत्[10] नरपतिसभम्[11]। एवं[12] चक्रवर्त्तिसभम्। [13]अराजशब्दपर्युदासाद् ईश्वरार्थादेव, तेनेह न भवति—देवदत्तसभा। अमनुष्यशब्दः पिशाचादौ रूढः—पिशाचसभम्। [14]तेनेह न भवति—देवसभा। अशालेत्यादि—[15]षष्ठीतत्पुरुषा-न्तोऽशालावाचकोऽपि[16] सभाशब्दो नपुंसकं भवति—दासीसभम्[17], वेश्यासभम्। अशालेति[18]—अनाथसभा अनाथकुटीत्यर्थः।[19] छायेत्यादि—षष्ठीतत्पुरुषान्तः छायाशब्दो बाहुल्ये गम्यमाने[20] नपुंसकं[21] भवति[22]—गृध्राणां छाया गृध्रछायम् एवं शलभछायम्[23] इत्यादि ॥५७॥[24]

वा स्युः सेना सुराछायानिशाशाला इमे पुनः।
उपज्ञोपक्रमौ नित्यं तदादित्वप्रकाशने ॥५८॥

अस्यार्थः[25]—एते शब्दाः [26]षष्ठीतत्पुरुषान्ताः पुनर्नपुंसका भवन्ति—सुराणां सेना सुरसेनम्, सुरसेना[27] इत्यादि। बहुत्वे इत्यनुवर्त्तते। [28]षष्ठी-तत्पुरुषान्तोपज्ञोपक्रमौ[29] नित्यं नपुंसके[30] भवतः[31]; यदि उपज्ञेयस्योप-

---

१. अ-पदमिदं न दृश्यते। टीकायान्तु "उदाहरणं पूर्वमुक्तम्" इत्येवास्ति। वस्तुतोऽस्याष्टीका पूर्वकारिकाटीकायामेव समाविष्टा कृता वर्त्तते। द्र० पूर्वकारिकायां टिप्पणी १७। ब-षष्ठीतत्पुरुष इत्यादि। २. अ-अरासनः, ब-अराजशाद।
३. अ-मनुष्य०, ब-०वाचिनश्चेप०। ४. अ-षष्टी०। ५. ब-लिंगं।
६. अ-उत्तरात्र शालार्थः प्रतिइह०। ब-उत्तर च अशाला०। ७. ब-समा०।
८. अ-गृहार्थके। ९. ब-गोष्ठश्च। १०. ब-०शब्दात्रावत्।
११. अ-न नरपतिसभम्। १२. अ-चक्रवर्त्तिसभा इत्यधिकः पाठः।
१३. अ-अराजपर्य्युदानदीश्च परार्थानदीश्च परार्था देवदत्तेनेह भवति। ब-०तेन हेन०।
१४. अ-वाक्यमिदं नोपलभ्यते। १५. अ-षष्टी०, ब-षष्ठीतत्पुरुषान्तौ।
१६. ब-अशावाचपि। १७. ब-दासीभम्।
१८. ब-आशालेति आशालेति इत्यधिकः पाठः।
१९. अ-अनाथकुटीत्यादि, ब-अनाथकुटी इत्यादि ॥४९॥ २०. ब-०गम्यमानेन।
२१. ब-नपुंसकलिंगं। २२. ब-भति।
२३. अ-शालभछायम्, ब-शालछायम्। २४. ब-॥५०॥
२५. अ-पदमिदं न दृश्यते। ब-वा स्युः सेनासुराशालेत्यादि।
२६. अ-षष्टी०। ब-तत्पुरुषाः षष्ठ्यन्ते न पूर्व्वा नपुंसकानि भवति। २७. ब-सुरसेन।
२८. अ-षष्टी०। २९. ब-०क्रमा। ३०. ब-नित्यनपुंसकं। ३१. ब-भवति।

क्रम्यस्य[1] चार्थस्य प्रकाशनं[2] भवति—चन्द्रोपज्ञं शंसकं व्याकरणम्[3], वेदोपक्रमो[4] धर्मः। चन्द्रेण वेदेन च[5] तेषां[6] प्रथमतो[7] ऽवतारणमित्यर्थः ॥५८॥

रात्राह्नौ पुंसि वा ज्ञेयावहःसुदिनपुण्यतः।
[8]पथो ऽसंख्यात्परः क्लीवे नकोर्वेश्चेति दर्शितः ॥५९॥

अस्यार्थः[9]—रात्राह्नशब्दौ[10] समासान्तौ पुंल्लिङ्गौ[11] बोद्धव्यौ—अहश्च रात्रिश्च अहोरात्रः। एवम् [12]अपराह्णः, पूर्वाह्णः, मध्याह्नः इत्यादि[13]। अहन्शब्दः समासान्तः[14] पुंल्लिङ्गो भवति। [15]एकश्चाहश्च तदेकाहः, [16]द्वयोरह्नोः समाहारः द्व्यह्नः। सुदिनपुण्याभ्यां न भवति—सुदिनाहम्, पुण्याहम्[17]। पथ इत्यादि।[18] [19]पथशब्दो ऽव्ययात्परं नपुंसकं भवति—[20]न पन्थाः अपथम्। नकोर्वेरित्यादि। कुशब्दात्परः समासान्तः पथशब्दो नपुंसकं न भवति, षष्ठ्यन्ते प्रकाशनमिति[21] चेद् भवति कोर्न[22] भवति, कुत्सितः पन्थाः कुपथः[23] कापथः[24]। वेरित्यादि। विशब्दात्परो हि[25] पथशब्दो नपुंसकं भवति वा—विरुद्धः पन्थाः विपथः विपथं वा ॥५९॥ इति समासोद्देशः ॥

सम्बन्धे कारके वृन्दे भावे गोत्र परत्र च।
कथ्यन्ते तद्धिता रूढाः समासान्ताव्यया अपि ॥६०॥

अस्यार्थः[26]—बुद्धो [27]देवता अस्य बौद्धः पुरुष इत्यादि ॥६०॥

॥ इति चन्द्रदासकारिकाः सटीकाः[28] ॥

---

१. अ-यदि यज्ञस्य चोपक्रमस्य, ब-यद्युपयज्ञयस्य चापक्रमस्य। २. अ-प्रकाश्यं।
३. ब-चन्द्रोप्यज्ञं प्रशंसकं व्याकरण। ४. ब-वेदोपक्रम०।
५. ब-चेतिपदं नास्ति। ६. ब-यत्तेषां। ७. अ-प्रत्यक्षो।
८. अ-यथो। ९. अ, ब-पदमिदं न दृश्यते। १०. अ-रात्राह्नाह्न०।
११. ब-पुंल्लिगे। १२. ब-मध्यान्हः पूर्व्वमध्यान्हः। १३. ब-पदमिदं नोपलभ्यते।
१४. ब-समासमब्दाः। १५. ब-एकं च अहश्चेति एकाहः। १६. ब-द्वयं०।
१७. ब-उदाहणमिदं न दृश्यते। १८. ब-पदमिदं नोपलभ्यते।
१९. ब-यथाशब्दः समासान्तो ऽव्यया०। २९. ब-नायं यथा०। २१. अ-प्रकारमिति०।
२२. ब-कि भवति। २३. ब-कुपंथः। २४. ब-उदाहरणमिदं न दृश्यते।
२५. ब-पदमिदं नास्ति। २६. अ, ब-पदमिदं न दृश्यते।
२७. ब-देवदस्य बोद्धव्य पुरुषः इति। २८. ब-वाक्यमिदं नोपलभ्यते।

शुचि कृष्णनवम्यां च सुराचार्यदिनेऽपि च ।
कारिकाचङ्गदासस्य टीकेयं रदिता मया ॥[1]

शालिवाहनस्य शाकाया द्विषष्ट्यधिकसप्तदशहायनपरिमिते व्यतीते समाप्तमिदं पुस्तकम् ॥[2]

०———०

चङ्गदासे कृतेऽभ्यासे किं करिष्यन्ति वादिनः ।
चङ्गदासे त्वनभ्यासे मा कश्चित्पण्डितायताम् ॥[3]

०———०

उद्ढौ भवतो यस्य यश्च प्रत्ययसन्धिजः ।
अन्तःस्थं तं विजानीयाच्छेषो वर्णीय उच्यते ॥[4]

मस्त्रिगुरुऽऽऽस्त्रिलघुश्च॥। नकारो भादिगुरुः ऽ॥ पुनरादिलघुर्यः ।ऽऽ ॥
जो [5]गुरुर्मध्यगतो ।ऽ। रलमध्यः ऽ।ऽ सोऽन्त्यगुरुः ।ऽऽ कथितोऽन्त्यलघुस्तः ऽऽ। ॥[6]

मयरसतजभानां ये हि देवा गणानां
क्षितिजलशिखिवायुव्योमसूर्येन्दुनागाः ।
विदधति किल लक्ष्मीवृद्धिमृत्युप्रवासान्
विभवविरहशोकान् कीर्त्तिमायुः क्रमेण[7] ॥१॥

अर्द्धं वसति वैकुण्ठे तदर्धं नर्त्तकगृहे ।
सर्वं वसति वाणिज्ये यो जानाति स पण्डितः[8] ॥२॥

मार्ग कृष्णा ५ रवौ श्रीमच्छुक्लवैकुण्ठनाथस्यार्थं द्विजपूर्णशर्म्मणा लिखितमिदम्पुस्तकम् सं० १९३० ॥ शुभम् ॥[9]

---

१. अ-श्लोको ऽयं न दृश्यते । २. अ-इदमपि वाक्यं न प्राप्यते ।
३. ब-श्लोकोऽयं न दृश्यते ।
४. ब-इतोऽग्रे सर्वेऽपि श्लोकाः नोपलभ्यन्ते । ते च प्रकृतविषयासम्बद्धा एव ।
५. अ-गुरुमध्य० । ६. वृत्तविषयकोऽयं श्लोकः ब पुस्तके नोपलभ्यते ।
७ ब-नोपलभ्यते । ८. ब-नोपलभ्यते । ९. ब-नोपलभ्यते ।

परिशिष्ट १

चङ्गदासकारिकाणां मूलपाठः

(जायन्ते यदनुध्यानाद् भजतां वाग्विभूतयः।
विभुर्जयति मंजुश्रीश्चतुर्मारारिशासनः ॥१॥[1])

यस्मिन्नर्थे विधीयन्ते त्यादितव्यादितद्धिताः।
समासो वा भवेद्यत्र स उक्तः प्रथमा ततः ॥१॥

उक्तस्यार्थस्य गृह्णन्ति संख्यानं त्यादयः परम्।
लिङ्गसंख्याविभक्तीस्तु कृत्तद्धितसमासजा. ॥२॥

द्वयोर्नाम्नोर्बहूनां वा यदि वाक्यं समुच्चये।
[2]अङ्गचयाश्रिता संख्या त्याद्यादौ वा विशेषणे ॥३॥

प्रकृतेर्विकृतेर्वापि यत्रोक्तत्वं द्वयोरपि।
वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्नतु ॥४॥

विशेष्येण सहैकार्थं भवेद्यत्र विशेषणम्।
तत्र लिङ्गादयः प्रायो विशेष्यस्था विशेषणे ॥५॥

लिङ्गसंख्याविभेदेऽपि उपमानोपमेयता।
विभक्तिः पुनरेकैव उपमानोपमेययोः ॥६॥

प्रयुक्ते गम्यमाने वा उक्ते युष्मदि मध्यमः।
तथास्मद्युत्तमस्ताभ्यामन्यत्र प्रथमो भवेत् ॥७॥

एकदा चेत्क्रियाकालवचनप्रतिपादनम्।
धातोर्नामादि[3]धूक्तेषु यः परः स पुमान् भवेत् ॥८॥

यदा ह्यर्थेन निर्देश्ये भवतो युष्मदस्मदी।
द्वयोरप्युभ[4]योर्योगे न धातोर्मध्यमोत्तमौ ॥९॥

गतिबुद्ध्यशनार्थानां शब्दार्थानामकर्म्मणाम्।
भवेदनिणि यः कर्त्ता इष्यसौ कर्मसंज्ञकः ॥१०॥

हृक्रोरनिणि यः कर्त्ता इष्यसौ कर्म्म वा भवेत्।
आत्मने विषये तद्वदभिवादि दृशोस्त[5]था ॥११॥

---

१. मङ्गलाचरणमिदं 'स' पाण्डुलिपिं विहायान्यत्र न दृश्यते। द-अर्हन्ताय नमः।
२. द-अङ्ग०।
३. स-दियुक्तेषु।
४. स-तयो०।
५. स, द-रपि।

[1]नीखादिट्टवादिशब्दायक्रन्दां कर्त्ता न कर्म्म सः ।
वहेरसारथौ हेतौ भक्षेर्धातोरहिंसने ॥१२॥[2]

प्रधानं नीवहादीनां दुहादेरुपसर्ज्जनम् ।
कर्म्मस्वीयमिणन्तानां[3] वाच्यं कर्त्ता प्रयोजकः ॥१३॥[4]

अभावादभिधेयस्य अन्यदप्याहकर्म्मजः ।
नाभिधत्ते[5] तु[6] कालादीन् कर्म्मणोऽन्यस्य सम्भवे ॥१४॥[7]

यदेवोक्तं विशेष्येण त्यादिना यदि वा कृता ।
विशेषणक्रियानुक्तमप्युक्तं तद् भवेदिति ॥१५॥[8]

उक्तमेवोक्ततां याति क्वचिदुक्तमनुक्तताम् ।
अनुक्तमपि चोक्तं[9] स्यात्क्वचिदेव पदान्तरैः ॥१६॥[10]

परस्मै वक्ति कर्त्तारं त्रीनर्थानात्मनेपदम् ।
भावाद्ये[11] विहिते सार्वधातुके [12]यण् [13]सम्भवे ॥१७॥[14]

सर्वे विकरणाः [15]कर्त्तृविहिते सार्वधातुके ।
अद्यतन्यां विभक्तौ[16] सिच् [17]सण् स्यात्कर्त्तृकर्म्मणोः ॥१८॥[18]

[19]चङ्णणौ कर्त्तरि स्यातामिच्[20] प्रायो भावकर्म्मणोः ।
[21]स्वस्तनी स्यसिजाशीःसु [22]भावे कर्मणि [23]चेज्वदिट् ॥१९॥[24]

हनिग्रहिदृशिभ्यश्च स्वरान्तेभ्यो विभाषया ।
अतिपत्तिः परोक्षा च ह्यस्तन्यद्यतनीति च ॥२०॥

चतस्रो ऽतीतकाले स्युर्वर्त्तमाना तु सम्प्रति ।[25]
भविष्यति भविष्यन्त्याशीरप्यन्वर्थतो[26] भवेत् ॥२१॥

[27]स्वस्तने [28]स्वस्तनी नित्यं सैवान्यात्र विभाषया ।[29]
विध्यादौ सप्तमी पञ्चम्याप्यानुज्ञाशिषोश्च सा ॥२२॥

---

१. द-नीखाद्यादि० । २. स-१६ । ३. अ-वाच्य । ४. स-१७ ।
५. द-०धत्ते । ६. द. स-च । ७. स-१८ । ८. स-१९ ।
९. स-नोक्तं । १०. स-२० । ११. स-भावाप्ये । १२. अ-यण ।
१३. स-सम्भवेत्, द-यद्भवेत् । १४. स-२१ । १५. स-कर्त्तृहि ।
१६. स-तु इत्यधिकः पाठः । १७ स-षण् । १८. स-२२ ।
१९. स, द-चणणौ । २०. स, द-०मिच्० । २१. स-श्वस्तनी ।
२२. स, द-०जाशीःषु । २३. स-चेण्वदिट्, द-वेज्वदिट् । २४. स-२३ ।
२५. स-२४ । २६. स, द-०रप्यर्थतो । २७. स, द-श्वस्तने ।
२८. स, द-श्वस्तनी । २९. स-२५ ।

[1]भावे शब्दान्तरे प्रयोगेऽपि स्युरन्यत्र स्वगोचरात् ।[2]
एवं विज्ञाय विज्ञेन प्रयोगः प्रतिपाद्यताम्[3] ॥२३॥

भावे कर्मणि कृत्याः स्युः कर्मकर्त्तरि केलिमः ।
अन्यत्रापि क्वचित्कृत्याः खलर्थाः[4] भावकर्मणोः ॥२४॥[5]

भावकरणयो[6] खल्[7] स्यादाशितोपपदाद् भुवः ।
[8]कृञः ख्युट् करणे वाच्ये[9] टक्सकौ [10]क्विप् च दृश्यते[11] ॥२५॥[12]

गत्यर्थात् क्तो भवेद् भूते [13]भावाद्याधारकर्त्तृषु ।
अव्याप्यात्कर्त्तरि क्तः स्यादथवा[14] धारभावयोः ॥२६॥[15]

[16]भावाधिकरणे व्याप्ये भक्षार्थात् क्तः प्रकीर्त्तितः ।
[17]भावे मात्रे पुनर्धातोरविवक्षितकर्मकात् ॥२७॥[18]

श्लिषः शीङो वसो[19]जृषेर्भासःस्याजन्रुहः परः ।
क्विषु क्तः स्यात्तथारम्भे शेषेभ्यः कर्मणि स्मृतः ॥२८॥[20]

अनन्तरविधेयोऽस्य सर्वस्मादपि कर्त्तरि ।
बहु घञादयो भावे केऽपि तेष्वपि कारके ॥२९॥[21]

[22]द्रव्यमिव कृद्भावे स्यात्तेन द्विवचनाद्यपि[23] ।
प्रायः सत्यामभिव्याप्तौ भावेऽर्थे[24] विहिताः कृताः[25] ॥३०॥[26]

[27]एकः कर्त्ता क्रियानेका चेत्तदा पूर्वकालतः ।
भावे [28]क्त्वाणममुष्मिंस्तु तदर्था चेत् क्रिया परा ॥३१॥[29]

---

१. स-शब्दान्तरस्य योगेऽपि । द-शब्दान्तरप्रयोगेऽपि । २. स-२६ ।
३. स-पंक्तिरियं न दृश्यते । ४. स-खलर्थो, अ-खलर्थौ ।
५. स-२७ । ६. द, स-०करणयोः । ७. द, स-ख्युः ।
८. द, स-ख्युट् कृञः । ९. स, द-व्याप्ये । १०. अ, ब-क्विप् ।
११. द-पश्यतेः । १२. स-२८ । १३. स-भावाप्याधार०।
१४. स, द-स्याद् यदिवा० । १५. स-२९ । १६. स, द-भावेऽधिकरणे ।
१७. स, द-भावमात्रे । १८. स-३० । १९. स, द-जृष आसस्थाजन०।
२०. स-३१। २१. स-३२ ।
२२. स-द्रव्यकृद्भावः वत्स्यात्तु, अ-इवकृद्भावे । २३. द-द्विवचनादपि ।
२४. स-भावार्थे, द-इवार्थे । २५. स, द-कृतः । २६. स-३३ ।
२७. द-एकष्कर्त्ता । २८. स, द-क्त्वादिरमुष्मिंस्तुम् ।
२९. स-३४ ।

बुण् तृच्प्रभृतयः सर्वे दृश्यन्ते कर्तृवाचिनः ।
[1]शतृङानशावपि कृन्सुः सापेक्षाः क्रियान्तरे[2] ॥३२॥

कृतो धात्वर्थसम्बन्धे स्युः कालान्तरवाचिनः ।
तद्धितास्त्यादयोऽप्येवमूहनीयाः प्रयोगतः[3] ॥३३॥

॥ इति कृदुद्देशः[4] ॥

[5]यत्रार्थेनाभिधीयन्ते त्यादिप्रभृतयश्च ते ।
सोऽनुक्तस्तत्रकर्मादौ द्वितीयाद्या विभक्तयः[6] ॥३४॥[7]

द्वितीया कर्मणि प्रोक्ता तृतीया कर्तृकारके ।
करणे च भवेत्सैव चतुर्थी सम्प्रदानतः ॥३५॥[8]

पञ्चमी स्यादपादाने षष्ठी सम्बन्धमात्रके ।
कर्मकर्त्रोः क्रियायोगे[9] द्वयोः प्राप्तौ न कर्त्तरि ॥३६॥[9A]

वा घञादेरकाकारे द्वयोरपि भवेदियम् ।
कृत्यानां न द्वयोरेवं वाच्ये[10] कर्त्तरि केवले ॥३७॥[11]

निष्ठोदन्ताव्ययो घञ्[12] तृण् शत्रानशकृन्सुभिर्न सा ।
भाविनी नावुण्[13] तस्मिन्केश्चयोगाद्दणे णिनेः ॥३८॥[14]

वा तु कर्त्तरि भावे क्ते [15]शतृङा कर्मणि द्विषः ।
[16]ख्याञो यत्ने कृदाख्याते [17]हृञश्चानुकृतौ तथा ॥३९॥[18]

स्मृतिर्हिंसार्थयोरेवं[19] तृप्त्यर्थकरणेऽपि[20] वा ।
आधारे वर्तमाने च क्तः[21] स्यात् कर्तृकर्मणोः ॥४०॥[22]

---

१. स-शतृशानावपि क्वसुः, द-शतृङानावपि क्वन्सुः । २. स-क्रियान्तरैः ॥३५॥
३. स-पंक्तिरियं न दृश्यते । समाप्तिसूचकं वाक्यमपि न दृश्यते । अग्रिमकारिकया सह मिलित्वा इयं कारिका त्रिपादिका ३६ अङ्किता च वर्त्तते । ४. अ-इति कृदुपदेशः ।
५. स-यत्रार्थेनोभि० । ६. स-यथाक्रमम्, द-यथायथम् । ७. स-३६ ।
८. स-३७ । ९. स-कृतायोगे, द-कृतां योगे । ९A. स-३८ ।
१०. स-वा च, द-वाचकः कर्तृकेवले । ११. स-३९ ।
१२. स-कञ्तृन्शत्रानक्वन्सु०, द-कञ्तृण्शन्त्रान्क्वन्सुभिर्न्नसा ।
१३. स-वुणा, द-वुणा । १४. स-४० । १५. स-शतृ च कर्मणि ।
१६. स, द-कृञो । १७. अ, ब-कृञ० । १८. स-४१ । १९. द-०रेव ।
२०. अ, ब-०करणोऽपि । २१. स-क्तस्य सा । २२. स-४२ ।

आधारे सप्तमी ज्ञेया निमित्तात्कर्मयोगतः ।
[1]क्तस्य चेत्प्रकृतेर्व्याप्ये क्रियाचिह्नं तु[2] यत्क्रिया ॥४१॥[3]

[4]ततश्चानादरे षष्ठी अपि निर्द्धारणे[5] तथा ।
कर्मप्रवचनीये च[6] द्वितीया समयादिभिः ॥४२॥[7]

उपर्य्यादिभिरप्यस्तैस्तस[8] तैरुभयादिभिः ।
प्रतिनिधौ परीवर्त्ते पञ्चमी प्रतिना युतात् ॥४३॥[9]

अधिना सप्तमी स्वाम्ये[10] उपेनाधि[11]विनापि सा ।
तृतीया पञ्चमी चैव[12] पृथक् नानाप्रयोगतः ॥४४॥[13]

स्तोकादेः करणे [14]सत्त्वादृणाद्धेतोर्गुणान्न[15] वा ।
यदर्थं किञ्चिदेवास्य [16]चतुर्थी सम्प्रदानतः ॥४५॥[17]

यस्मै कुप्यति तस्माच्च नम आदिभिरप्यसौ ।
व्याप्येऽनध्वनि चेष्टायां गत्यर्थानां विभाषया ॥४६॥[18]

[19]विना युक्ताद् द्वितीया सा[20] पञ्चमी च विशेषतः ।
तृतीया लक्षणे हेतौ सहार्थेन च युक्ततः ॥४७॥[21]

मन्यतेरप्यनावादौ नादरो यत्र गम्यते ।
पञ्चमी च द्वितीया च ऋते युक्तादियं द्वयी[22] ॥४८॥[23]

॥ इतिकारकोद्देशः ॥[24]

षष्ठी स्याद्धेतुना सर्वा हेत्वर्थैः सर्वनामतः[25] ।
कर्मादीनां विवक्षाभिरूहनीयाः प्रयोगतः ॥४९॥[26]

---

१. स-क्तस्येन प्रकृते०, द-क्तस्येन्प्रकृ० । २. द-च ।
३. स-४३ । ४. स-ततः सानादरे० । ५. स, द-निर्धारणात्तथा ।
६. स-०नीयैवँ, द-०नीयेन । ७. स-४४ ।
८. स-स्त, द-०रभ्यस्तैस्त० । ९. स-४५ ।
१०. अ, ब-साम्ये । ११. स-किनोपि, द-किनापि ।
१२. द-चैत्र । १३. स-४६ । १४. द-साम्यादृ० । १५. स-०तोगुणात्तु वा ।
१६. स-स्याच्चतुर्थी सम्मता ततः, द-स्याच्च० । १७. स-४७ ।
१८. स-४८ । १९. स-विना युक्ताच्च सापि स्यात्तृतीया च विशेषतः ।
२०. द-स्यात्तृतीया च। २१. स-५० । २२. अ-द्वयम् ।
२३. स, द-४९ । २४. अ-पुस्तके तु इतिकारणोद्देशः पाठः ।
२५. स-सर्वनामभिः । २६. स-५१, द-४८ ।

समस्यन्ते द्वितीयाद्या [1]यत्र नामपदैः परैः ।
स तत्पुरुष इत्युक्तो यत्परं तत्परं बहु[2] ॥५०॥[3]

विशेषणं विशेष्येण एकार्थं यदि तद्द्वयम् ।
स कर्मधारयस्तस्मिन् प्रायः पूर्वं विशेषणम् ॥५१॥[4]

तद्धितार्थे समाहारे [5]उत्तरस्मिन् पदे परे ।
[6]समासोऽयं द्विगुर्यत्र संख्या संख्येयवाचिभिः ॥५२॥[7]

उभौ तत्पुरुषावुक्तौ तेन कार्यं तदाश्रयम् ।
[8]लक्षता लक्षलक्ष्येषु लक्षणेक्षणदक्षिणा[9] ॥५३॥

यत्रानेकं परस्यार्थे स [10]बहुव्रीहिरुच्यते ।[11]
[12]सरूपे यदि वा युद्धे दिशां नाम्नां विदिश्यपि[13] ॥५४॥

इतरेतरयोगे च समाहारेऽपि[14] चार्थयोः ।
स समासो भवेद् द्वन्द्वो नाम्नोर्नाम्नां समुच्चये ॥५५॥[15]

तस्मिन्नल्पस्वरं पूर्वं प्रायो यच्चार्चितं द्वयोः ।
यत्रासंख्या[16] विभक्त्यादौ सोऽव्ययीभाव उच्यते ॥५६॥[17]

षष्ठीतत्पुरुषे[18] [19]ऽराजपुरुषाभ्यां[20] सभा परा ।
क्लीबे शालाभिधेयेऽपि[21] छाया बाहुल्यपूर्विका[22] ॥५७॥[23]

वा स्युः सेना सुरा[24]छाया निशा शाला इमे[25] पुनः ।
उपज्ञोपक्रमौ[26] नित्यं तदादित्व प्रकाशने ॥५८॥[27]

---

१. स-नाम्ना परपदेन यत् । २. स-बहुः ।
३. स-५२ । ४. स-५३ । ५. स-स्यादुत्तरपदे ।
६. स- स समासो द्विगु० । ७. स-५४ ।
८. स-पंक्तिरियं नावलोक्यते । द-लक्षतां लक्ष्यलक्ष्येषु । ९. द-दक्षिणाः ।
१०. स, द-बहुव्रीहिः स उच्यते । ११. स-५५ । १२. अ, ब-स्वरूपे ।
१३. स-विदिक्ष्वपि । १४. द-च । १५. स-५६ ।
१६. स, द-यत्रासंख्यं । १७. स-५७ । १८. स-पुरुषो० ।
१९. द-ऽराजा० । २०. स, द-०मनुष्याभ्यां परा सभा ।
२१. स-०शालाभिधेयापि, द-०धेयायां । २२. स-पूर्वका ।
२३. स-५८ । २४. स, द-शाला निशा छाया । २५. स-इमाः ।
२६. स-०क्रमो । २७. स-५९ ।

रात्राह्नौ पुंसि [1]वा ज्ञेयावहःसुदिनपुण्यतः ।
[2]पथो ऽसंख्यात्परः क्लीवे [3]नकोर्वेश्चेति दर्शितः ॥५९॥[4]

सम्बन्धे कारके वृन्दे भावे गोत्र[5]परत्र च ।
कथ्यन्ते तद्धिता रूढाः समासान्ताव्यया[6] अपि ॥६०॥[7]

---

१. स-विज्ञेयौ अहो सुदिन । द-विज्ञेयावहोऽसुदिन० । २. स-पथोऽव्ययात्परः, अ-यथो० ।
३. स-नकोरेवेति दर्शनम् । द-नकोर्व्वेर्व्वेति दर्शितम् । ४. स-६० ।
५. स, द-गोत्रे । ६. द-०न्ताअव्यया० ।
७. स-६१ । इतिचङ्गवृत्तिः समाप्ता । द-इतिचङ्गदास कृतो तद्धितपटलः षष्ठः ।

०—०

परिशिष्ट २

अथ कृष्णचन्द्रदासकृता वृत्तिसहिता अज्ञातकर्त्तृकटिप्पणस्य सारांशेन चान्विताश्चङ्गदासकारिकाः ॥

०—०

जायन्ते यदनुध्यानाद् भजतां वाग्विभूतयः ।
विभुर्जयति मञ्जुश्रीश्चतुर्मारारिशासनः ॥१॥

वृत्तिः—श्रीमद्गुरुभ्यो नमः । ग्रन्थादौ विघ्नोपशमनाय शिष्टाचारपरिपालनाय च चङ्गदास [1]आशीर्लक्षणमङ्गलमाचरति—**जायन्त** इति । विभवतीति विभुर्वासुदेवः, स जयति सर्वोत्कर्षेण वर्त्तते । स कः ? यस्यानुध्यानात् चिन्तनात् वाग्विभूतयः वचनसम्पत्तयः जायन्ते । केषाम् ? भजताम् । कीदृशः सः ? मञ्जुर्मनोज्ञा श्रीः संपत् यस्य स मञ्जुश्रीः । [2]मनोज्ञं मञ्जुमञ्जुलमित्यमरात् । चत्वारश्च ते माराश्चेति चतुर्माराः कामक्रोधशोकमोहास्ते च ते अरयश्चेति चतुर्मारारीणां शासनः, षष्ठीसमासः । मारयन्तीति माराः, हिंसका इत्यर्थः । अथवा स मञ्जुश्रीः सुगतो जयति । किं विशिष्टः ? विभुः मञ्जुश्रीः सुगत इति त्रिकाण्डशेषात् । अस्मिन् पक्षे दैवमारो राजमारो ब्रजमारो मनुष्यमार इत्येवं विधाश्चतुर्माराः, ते च ते अरयश्चेति चतुर्मारारीणां शासनः, इति षष्ठीसमासः । अन्यत्सर्वं पूर्ववत् ॥१॥

टिप्पणम्—श्रीअर्हन्तायनमः ।

कारिका १. यस्मिन्नर्थे····· प्रथमा ततः ।

वृत्तिः—**यस्मिन्नर्थ इति** । त्यादितव्यादितद्धिताः प्रत्ययाः यस्मिन्नर्थे विधीयन्ते, समासो वा यत्र भवेत्सोऽर्थ उक्तो भवति । तत उक्तात्प्रथमा वेदितव्या । अंकुरो भवति । वर्द्धते इन्दुः । राज्ञा जीयते शत्रुः । वास्तव्यो देवदत्त इति वसेः कर्त्तरि दीर्घश्च रूढत्वात् । पाचकः । सूपकारः । कर्त्तव्यः कटो भवता । दुर्जेयो दुर्गस्थः परचक्रेण । स्नानीयं चूर्णम् । दानीयो विप्रः । समावर्त्तनीयो गुरुः । जगतामाधारः कूर्मः । रत्ननिलयः समुद्रः । नैयायिको जटाधरः । आरूढवानरोऽयं वृक्षं स आरूढवानरः वृक्षः । एवं दत्तभोजनो ब्राह्मणः । कृतप्रणामः । उच्छन्नजनपदः । चित्रगुः । बहूदका नदी ॥२॥

टिप्पणम्—सम्बन्धे कृत्प्रयोगो न दृश्यते । सप्तमी यथा—दोहनी घटी ।

---

१. आशि० । २. मनोज्ञं० ।

कारिका २. उक्त यार्थस्य····· समासजाः ॥

वृत्तिः —उक्तस्येति । त्यादय उक्तस्यार्थस्य संख्यानं संख्यामात्रं परं केवलं गृह्णन्ति । कृत्तद्धितसमासकाः पुनः उक्तस्यार्थस्य लिङ्गसंख्याविभक्तीर्गृह्णन्ति । करोति पुरुषः । कुरुतः पुरुषौ । कुर्वन्ति पुरुषाः । क्रियते कटः । क्रियेते कटौ । क्रियन्ते कटाः । कारकः पुमान् । कारकौ पुमांसौ । कारकाः पुमांसः । एवम्—कारिका स्त्री । कारकं कुलम् । शतिकः पटः । शतिका पटी । शतिकं वस्त्रम् । एवमारूढवानरो वृक्षः । आरूढवानरा शाखा । आरूढवानरं वृक्षाग्रम् ॥६॥

कारिका ३. द्वयोर्नाम्नो·····विशेषणे ॥

वृत्तिः—द्वयोरित्यादि । द्वे नाम्नी बहूनि नामानि यदि समुच्चये वाक्ये[1] प्रयुज्यते । कोऽर्थः ? प्रयोगः क्रियते । तदा, अङ्गाश्रिता चयाश्रिता वा संख्या त्याद्यादौ कृत्तद्धितसमासेषु विशेषणे च प्रयोक्तव्या । **अङ्गमवयवः** । **चयः** समुदायः । अङ्गाश्रितत्वाद् द्विवचनबहुवचने, चयाश्रितत्वादेकवचनम् । हरिश्च हरश्च जयतः जयति वा । हरिश्च हरश्च कमलासनश्च जयन्ति जयति वा । प्रायिकत्वात् युष्मदस्मदो मध्यमोत्तमविषये समुदायाश्रितमेकवचनं न भवति । अवयवाश्रिते द्विवचनबहुवचने पुनर्भवतः । एवम्—स च त्वं च पचथः । त्वं चाहं च पचावः । क्वचिद्—गमकत्वाच्च शब्दं विनापि—त्वम् अहं गतौ (गतो) वा ॥७॥

टिप्पणम् - समुदायाश्रये एकवचनम् । अवयवाश्रये एकवचनद्विवचने (?) ।

कारिका ४. प्रकृतेर्विकृतेर्वापि·····नं तु ॥

वृत्तिः—प्रकृतेरित्यादि । यत्र प्रयोगे प्रकृतेर्विकृतेर्वापि द्वयोरप्युक्तत्वं भवेत् तत्र प्रयोगे वाचकः । कोऽर्थः ? कर्तृकर्मविहितप्रत्ययः । प्रकृतेः संख्यां गृह्णाति न तु विकृतेः । आद्यावस्था प्रकृतिः, द्वितीयावस्था विकृतिः । पटो भवन्ति तन्तवः । वीरणानि क्रियन्ते कटः । सुवर्णानि क्रियन्ते कुण्डलम् । तण्डुलाः पच्यन्ते ओदनः । प्रकृतेः संख्यां गृह्णात्युपलक्षणत्वात्ततो[2]ऽस्त्रीभूताऽलिङ्गमपि ॥८॥

टिप्पणम्—सुवर्णं कुण्डले भवतीत्यादि ।

---

१. वाक्यं । २. ०त्त तदो० ।

कारिका ५. विशेष्येण·····विशेषणे ॥

वृत्तिः—विशेष्येणेत्यादि । यत्र प्रयोगे विशेष्येण सह विशेषणमेकार्थं भवेत् । कोऽर्थः ? तुल्यार्थं भवेत् । तत्र प्रयोगे विशेष्यस्था लिंगाः । कोऽर्थः ? लिंग-संख्याविभक्तयः । **प्रायो** बहुल्येन विशेषणे प्रयोक्तव्याः । द्विजः पण्डितो भवति । द्विजौ पण्डितौ भवतः । द्विजाः पण्डिताः भवन्ति । क्रियते कटो महान् । क्रियेते कटौ महान्तौ । क्रियन्ते कटाः महान्तः । एवम्—घटं करोति महान्तम् । देवदत्तेन चतुरेण कृतम् । ब्राह्मणाय कुलीनाय देहि । महतःपर्वतादवरोहति । वीरस्य राज्ञः पुरुषः । अतलस्पर्शे समुद्रे रत्नानि सन्ति । एवमनेकविशेषणेऽपि—द्विजः पण्डितो महान् भवति । प्राय इति वचनाद्—दानपात्रं श्रोत्रियः । पुरुषः प्रकाण्डः नृपतिः । विंशतिपुराणाः । चत्वारिंशदित्यादिष्वप्येवम् । विंशतिशब्दादारभ्य शतात्पूर्वा या संख्या सा स्वभावात् स्त्रियामेकत्वे च वर्त्तते । विशेषस्यापि लिंगसंख्या न भजते । एवम् शतसहस्रायुतनियुतकोट्यर्बुदवृन्दखर्वनिखर्वशंखपद्मसागर-अन्त्यमध्यपरार्द्धानि नपुंसके एकत्वे च तथा—कोटिः स्त्रियाम् । **विशेषणे** लक्षमपि । शतं पुरुषाः । सहस्रं स्त्रियः । इत्यादि । अन्त्यपद्मसागरा अपि पुंसि । यदा शतादयः संख्यान्तरेण संख्यायन्ते तदाऽद्वेशते । त्रीणि सहस्राणि ॥६॥

कारिका ६. लिङ्गसंख्या·····उपमानोपमेययोः ॥

वृत्तिः—लिङ्गसंख्येत्यादि । लिंगभेदे संख्याभेदे लिंगसंख्ययोः भेदे अभेदेऽपि उपमानोपमेयता । कोऽर्थः ? उपमानोपमेयभावो भवति । उपमानोपमेययोः विभक्तिः पुनरेकैव भवति । उपमीयते येन तत् उपमानम् । उपमीयते यत्तदुपमेयम् । **लिङ्गभेदे** तावत्—मत्तमातंग इव नितम्बिनी विहरति । संख्याभेदे—स इवामी मधुरं गायन्ति । लिंगसंख्ययोर्भेदे—स्वामीव प्रकृतयः सेव्याः । अभेदेऽपि—मत्तमातंग इव तुरंगो धावति । तुरंगवद्धस्ती धावति । देवमिव भवन्तं पश्यामि । देवेनेव भवता कृतम् ॥१०॥

कारिका ७. प्रयुक्ते ·····प्रथमो भवेत् ॥

वृत्तिः—प्रयुक्त इत्यादि । युष्मदि प्रयुक्ते गम्यमाने वा उक्ते सति मध्यमः पुरुषो भवति । तथास्मदि प्रयुक्ते गम्यमाने वा उक्ते सति उत्तमः पुरुषो भवति । आभ्यां युष्मदस्मद्भ्याम् अन्यस्मिन् नाम्नि प्रयुक्ते गम्यमाने वा उक्ते

सति प्रथमः पुरुषो भवति । त्वं करोषि । युवां कुरुथः । यूयं कुरुथ । अहं करोमि । आवां कुर्वः । वयं कुर्मः । स करोति । तौ कुरुतः । ते कुर्वन्ति । **अगम्यमानेऽपि**—करोषि, कुरुथः, कुरुथ; करोमि, कुर्वः, कुर्मः; करोति, कुरुतः, कुर्वन्ति ॥११॥

टिप्पणम् – गम्यमाने वेति—करोषीत्युक्ते त्वमिति गम्यते । उक्ते कर्मणि क्रियत इति । देवदत्तेन क्रियसे त्वम् । देवदत्तेन क्रियेऽहम् ।

कारिका ८. एकदा चेत्·····भवेत् ॥

वृत्तिः— एकदेति । एकदा । कोऽर्थः ? एकस्मिन् काले यदि क्रियाकालवचनानि प्रतिपाद्यानि भवेयुः, तदा धातोः नामादियुक्तेषु नामयुष्मदस्मत्सु सत्सु **यः परः स पुमान् भवेत्**—स च त्वं च पचथः । त्वं चाहं च पचावः । स च त्वं चाह च पचामः । प्रथमादिविधानात् सूत्रकृतपूर्वपरभागो न तु शब्दप्रयोगः कृतः । तेन त्वं च स च पचथ इत्यादिप्रयोगविपर्यये रूपं मन्तव्यम् ॥१२॥

कारिका ९. यदाह्यर्थेन·····मध्यमोत्तमौ ॥

वृत्तिः—यदेत्यादि । यदा यस्मिन् काले **युष्मदस्मदौ** ह्यर्थेन अभूततद्भावेन निर्देश्ये भवतः, तदा **द्वयोरपि** तयोर्योगे । कोऽर्थः ? युष्मदस्मदोर्योगे धातोर्मध्यमोत्तमौ न भवतः । अभूतस्य अजातस्य तदात्मनाभावो अभूततद्भावः—अहं त्वं सम्पद्यते । अनहमहं सम्पद्यते । त्वद् भवति, मद्भवतीत्यादि ॥१३॥

कारिका १०. गतिबुद्ध्यश·····संज्ञकः ॥

वृत्तिः—गतिबुद्धीति । गत्यर्थानां बुद्ध्यर्थानाम् अशनार्थानां शब्दार्थानाम् अकर्मकाणां च धातूनां प्रयोगेऽनिणि सति यः कर्त्ता स कर्त्ता इणि[1] सति कर्मसंज्ञो भवेत् । गच्छति ग्रामं देवदत्तः । गमयति ग्रामं देवदत्तं यज्ञदत्तः । बुध्यते व्याख्यानं छात्रः । बोधयति व्याख्यानं छात्रं गुरुः । अश्नाति यवान् बलीवर्दः । आशयति यवान् बलीवर्दं गोरट् । पठति वेदं माणवकः । पाठयति वेदं माणवकमुपाध्यायः । उत्पद्यतेऽङ्कुरः । उत्पादयत्यङ्कुरं देवदत्तः । स्वपिति पुत्रः ।

---

१. इनि ।

स्वापयति पुत्रं माता। गतीत्यादीनामिति किम्? पाचयत्योदनं सूपकारेण द्विजः ॥१४॥

कारिका ११. हृक्रोरनिणि·····दृशोस्तथा ॥

वृत्तिः—हृक्रोरित्यादि। हृक्रोर्धात्वोः अनिणि[1] सति यः कर्त्ता स कर्त्ता इणि[2] सति कर्म वा भवेत्। हरति भारं वंठः। हारयति भारं वंठं साधुः वंठेनेति वा। करोति कटं देवदत्तः। कारयति कटं देवदत्तं यज्ञदत्तः देवदत्तेनेति वा। **आत्मने** इत्यादि। **अभिवादि दृशोरप्यात्मनेपदविषये तद्वत्**—अभिवदते वृद्धान् कुमारः। अभिवादयते वृद्धान् कुमारं जनकः कुमारेणेति वा। पश्यन्ति भृत्या आत्मानम्; दर्शयते भृत्यान् आत्मानं राजा भृत्यैरिति वा। आत्मनेपदविषयेति किम्? देवानभिवादयति दानपतिना शंखवादकः। प्रयोज्ये कर्त्तर्य्यनुक्तत्वाद् दानपतिशब्दे तृतीयैव—दृशेर्बोधार्थयता पूर्वेण प्राप्ते विकल्पमिति—यथा वत्सः क्षीरं क्षयं दृष्ट्वा परित्यजति मातरम् इति। दर्शयति चित्रं देवदत्तं यज्ञदत्तः इति नित्यं कर्मसंज्ञा, तेनानुक्ते कर्मणि प्रयोज्ये द्वितीयैव ॥१५॥

कारिका १२. नीखाद·····रहिंसने ॥

वृत्तिः—नयतेर्गत्यर्थतया खादि क्रादेरशनार्थतया ह्वयतेः शब्दार्थतया क्रन्देरकर्मकतया प्राप्तिप्रतिषेधः। **नीखादीत्यादि**—नीखादिह्वादिशब्दायक्रन्दाम् इत्येतेषां धातूनां अनिणि सति यः कर्त्ता स कर्त्ता इणि सति कर्मसंज्ञो न भवेत्। अजां नयति ग्रामं देवदत्तः। अजां नाययति ग्रामं देवदत्तेन यज्ञदत्तः। खादति कदलीं पोतः। खादयति कदलीं पोतेन जनकः। आह्वयति श्येनं वाजपालः[3]। आह्वाययति श्येनं [4]वाजपालेन कुतूहली। अत्ति गुडं बालः। आदयति गुडं बालकेन माता। शब्दायते कीचकः। शब्दाययते कीचकेन मारुतः। क्रन्दति बालकः। क्रन्दयति बालकेन दुर्जनः। **वहेरित्यादि**। कोऽर्थः? वहधातोरसारथौ हेतौ सारथेरन्यो यदि प्रयोजकः स्यात्तदाऽऽनिणि यः कर्त्ता स कर्त्ता इणि सति कर्मसंज्ञो न भवेत्। वहति भारं ग्रामं वंठः। वाहयति भारं ग्रामं वंठेन साधुः। सारथौ पुनर्भवत्येव—वहन्ति वलीवर्दाः[5] शकटम्। वाहयति बलीवर्दान् शकटं शाकटिकः। **भक्षेरित्यादि**। भक्षधातोरहिंसने गम्यमानेऽनिणि

---

१. अनिनि।
२. इनि।
३, ४. वाजि०।
५. द-बलीवद्र्दान्।

सति यः कर्त्ता स कर्त्ता इणि सति कर्मसंज्ञो न भवेत्—भक्षयति गुडं पोतेन जनकः। हिंसायां पुनर्भवत्येव—भक्षयति वलीवर्दान् शस्यं गोरट्। यस्य हि तं शस्यं, स तद्भक्षणात् पीडितो भवतीति हिंसा गम्यते। भक्षयति मृगान् शूकः[1] किरातः ॥१६॥

कारिका १३. प्रधानं नीवहादीनां·····प्रयोजकः ॥

वृत्तिः—प्रधानमित्यादि। नी वहि हृकृषी—एते नीवहादयः। नीवहादीनां प्रधानं कर्मवाच्यं स्यात्। कोऽर्थः ? उक्तः स्यात्। अजा नीयते ग्रामं देवदत्तेन। उह्यते भारो ग्रामं वंठेन। ह्रियते भारो ग्रामं वंठेन। क्रृष्यते शाखा ग्रामं देवदत्तेन। एष्वजादेर्नीयमानस्य कर्मणः प्राधान्यं, तदर्थत्वात् क्रिया प्रवृत्तेः। दुहादीनां प्रयोगे उपसर्जनम्। कोऽर्थः ? गौणं कर्मवाच्यं स्यात्। दुहि याचि रुधि प्रच्छि भिक्षि चिञामुपयोगनिमित्तमपूर्वविधौ, ब्रूशासि गुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना, पयः प्रभृतिकर्मणां दोहादिक्रियाप्रवृत्तिहेतूनां यन्निमित्तं शब्दादि ब्रूञिशास्योर्गुणेन शब्दादिना यत्सचते यत्सम्बध्यते—शिष्यादितदकीर्त्तितम् अकथितमपादानादिविवक्षाभिर्न विवक्षितं तत्कर्मसंज्ञं भवति। तत्र चकारेण [2]याचनार्था धातवो गृह्यन्ते। अपरेऽपि जि दण्डि प्रभृतयश्चोपसंख्यायन्ते ब्रुवन्तीत्यर्थः। पच ग्रह वदि गदि भाष्यभिधाञ् चक्षिङ्-ख्याकथप्रभृतयोऽपि गृह्यन्ते। दुह्यते गौः पयो गोपालकेन। याच्यते राजा कम्बलं ब्राह्मणेन। रुध्यते गा व्रजो गोपालकेन। पृच्छते गणको यात्रां प्रयाणाभिमुखेन। भिक्ष्यते घृतौदनं गृहस्थो माणवकेनाऽवचीयते वृक्षः फलानि पथिकेन। उच्यते शिष्यो धर्मं गुरुणा। अनुशिष्यते छात्रः शास्त्रमुपाध्यायेन। **अर्थग्रहणात्**—भिक्ष्यते राजा कम्बलं ब्राह्मणेन। जीयते मण्डलं प्रतिभूयो नरपतिना। दण्ड्यते दुर्वृत्तः सहस्रं कारुणिकेन। ममन्थे जलधिरमृतं वासुदेवेन। उच्यते धर्ममुपाध्यायेन शिष्यः। एवं निगद्यते भाष्यते अभिधीयते कथ्यते इत्यादि। **कर्मस्वीयमित्यादि**। इणन्तानां स्वीयं कर्मवाच्यं स्यात्। कोऽर्थः ? उक्तं स्यात्। यथा—गम्यते ग्रामं देवदत्तो यज्ञदत्तेन। बोध्यते छात्रः शास्त्रं पण्डितेन। **कर्त्तेत्यादि**। इणन्तानां कर्तृद्वयसम्भवे प्रयोजकः कर्त्ता वाच्यो भवेत्, न तु प्रयोज्यः। प्रयुज्यते यः सः प्रयोज्यः। पाचयत्योदनं सूपकारेण देवदत्तः। घातयति शत्रुं सामन्तेन नृपतिः। दोहयति गां गोपालकेन गृहस्थः ॥१७॥

---

१. शूतः (?)। २. याचन्नार्था।

टिप्पणम्—कर्म्मस्वीयमिति। यथा—गम्यते ग्रामो देवदत्तो यज्ञदत्तेन। कर्मेति। पाचयत्योदनं देवदत्तेन यज्ञदत्तः इत्यादि। यदा इनन्तादपि इन् तदापि—पाचयत्योदनं देवदत्तेन यज्ञदत्तेन विष्णुमित्रः।

कारिका १४. अभावादभिधेयस्य.....सम्भवे ॥

वृत्तिः—अभावादित्यादि। अभिधेयस्य वाच्यस्य कर्मणोऽभावात् कर्मजः प्रत्ययोऽन्यदप्याह वक्तीत्यर्थः। दुह्यन्ते गोभ्यो गवां गोषु वा पयांसि गोपालकेन। याच्यते पौरवात् पौरवस्य पौरवे वा कम्बलो ब्राह्मणेन। **नाभिधत्त इत्यादि**। अन्यस्य कर्मणः सम्भवे सति कालादीन् कालाध्वभावदेशान् नाभिधत्ते न वक्तीत्यर्थः। मासमधीयते वेदो माणवकेन। क्रोशमधीयते वेदो माणवकेन। ओदनपाचकमक्षा दीव्यन्ते रसिकेन। [1]अनिशं समधिशय्यते खट्वा निद्रालुना। **अन्यस्य कर्मणोऽसम्भवे** कालादय उच्यन्ते—षण्मासाः शिशिरे कुम्भकर्णेन। चत्वारो मासाः शय्यन्ते नारायणेन। गोदोहः स्थीयते त्वया। क्रोशो व्रीहिभिर्भूयते वृषभेन[2] (वष्कयेण वा)। भुजे आरूप्यते गव्यूतिः आसुरेण शुष्यन्ते कुदेशा. खः (?) ॥१८॥

कारिका १५. यदेवोक्तं.....भवेदिति ॥

वृत्तिः—यदेवोक्तमित्यादि। त्यादिना विशेष्येण यदेवोक्तम् अथवा कृता विशेष्येण यदेवोक्तं विशेष्येण क्रियानुक्तमपि तदुक्तं तद् भवेत्। भुक्त्वा गच्छति बुभुक्षितः। भोजनपूर्वं गमनं करोतीत्यर्थः। दातुं पचति धार्मिकः पक्ता वा ॥१९॥

टिप्पणम्—त्यादिना कृता च क्रियावता विशेष्येण यदुक्तं तयोर्विशेषणेन क्रियया, अनुक्तमपि यदुक्तं भवति। यथा—ओदनं[3] भुक्त्वा गच्छति देवदत्तः गतो वा।

कारिका १६. उक्तमेवोक्ततां.....पदान्तरैः ॥

वृत्तिः—उक्तमेवेत्यादि। क्वचित्पदान्तरैर्योगे उक्तमेवोक्ततां याति। क्वचित्पदान्तरैर्योगे अनुक्तमपि नोक्तं स्यात्। **उक्तमेवोक्ततां यातीति**—नृत्यति

---

१. अनृषं। २. वष्णभेन। ३. उदनं।

गायति नटः। पठति शृणोति शिष्यः। नृत्यन्तं नटमवलोकयति रसज्ञः। आगच्छन्तम् अभ्यागतं प्रत्युद्गच्छत्याचारकुशलः। **अनुक्तमपीति**—नृत्यते गीयते नटेन। पठ्यते[1] श्रूयते शिष्येण। भोक्तुमोदनं पचति बुभुक्षितः[2] ॥२०॥ हरिरों तत्सत्। **इतिसामान्योद्देशः**।

टिप्पणम्—पदान्तरैरिति वक्ष्यमाणेन[3] पदेनाभिसम्बन्धः। आख्यात-तद्धितसमासैर्यदुक्तं तदप्येभिरेव पदान्तरैः पुनरुक्ततां याति उक्तं भवतीत्यर्थः।

कारिका १७. परस्मै वक्ति····· सम्भवे ॥

वृत्तिः—परस्मा इत्यादि। परस्मैपदं कर्त्तारं वक्ति प्रतिपादयति—तत्र भवतीत्यर्थः। **त्रीनित्यादि**। आत्मनेपदं त्रीनर्थान् कर्त्तृकर्मभावान् वक्ति प्रतिपादयति—तेषु भवतीत्यर्थः। ओदनं पचते बुभुक्षितः। भवता ओदनं पच्यते। आस्यते भवता। **भावाप्येत्यादि**। भावश्च आप्यं च भावकर्मणी तयोर्विहिते सार्वधातुके ज्यं यण् भवेत्। भूयते अंकुरेण। क्रियते कटो देवदत्तेन ॥२१॥

टिप्पणम्—परस्मैपदं कर्त्तारं वक्ति। एतेन कर्त्ता उक्तो भवतीति दर्शितम्। आत्मनेपदं त्रीनर्थान् वक्ति—भावकर्मकर्त्तृकान्। यत् यस्माद्धेतोः भावकर्म-विहिते सार्वधातुके यण् भवति। तेन यण् प्रत्ययेन उक्तं कर्म भवतीत्यर्थः।

कारिका १८. सर्वे विकरणाः····· कर्मणोः ॥

वृत्तिः—सर्व इत्यादि। सर्वे अन्नाशदयो विकरणाः कर्तृविहिते [4]सार्वधातुके भवेयुः। भवति[5], अत्ति, जुहोति, दीव्यति, सुनोति, तुदति, रुणद्धि, तनोति, क्रीणाति, चोरयति। **अनद्यतन्यामित्यादि**। कर्त्तृकर्मविहितायामद्यतन्यां विभक्तौ परतः सिच् सण् स्यात्—अकार्षीत् कटं देवदत्तः। अकृषातां कटौ देवदत्तेन। [6]अक्रुक्षत् पुत्रं जनकः। अक्रुक्षातां[7] पुत्रौ जनकेन ॥२२॥

---

१. पाठ्यते। २. बुभुक्षितः। ३. वक्ष्यमानेन।
४. मूलपाठगत सार्वधातुके' इत्यत्र पार्श्वे चतुर्णां लकाराणां सार्वधातुकसंज्ञा'' इति टिप्पणी वर्त्तते।
५. भवन्ति। ६. अधुक्षत्। ७. अधुक्षातां।

टिप्पणम्—अपरे च विकरणाः सर्वे कर्त्तर्य्येव भवन्ति। एतेन विकरणैः कर्त्ता उक्तो भवतीति दर्शितम्। यथा—पचत्योदनं देवदत्तः इत्यादि। ..... सिच् कर्त्तरि। यथा--अकार्षीत् इत्यादि। कर्त्तरि—अक्रुक्षन्। कर्मणि—अक्रुक्षातां सामन्तौ नृपतिनेत्यादि। सण्—अद्यतन्यां कर्त्तरि कर्मणि च—अशिश्रियत् देवदत्तं यज्ञदत्तः।

कारिका १९. चङ्णणौ.....चेण्वदिट् ॥

वृत्तिः—[1]**चणणावित्यादि**। कर्त्तरि विहितायामद्यतन्यां चणणौ स्याताम्—अजीगमत्सहाय तीर्थं देवदत्तः। अवोचद् धर्मं व्यास इत्यादि। **प्रायो** बाहुल्येन भावकर्मणोर्विहितायामद्यतन्याम् इट् भवति। अभावि देवदत्तेन। अकारिषातां कटौ भवता। प्राय इति वचनाददीपिदीप इत्यादि। **श्वस्तनीत्यादि**। भावे कर्मणि च विहितासु श्वस्तनी स्यसिजाऽऽशीःषु ॥२३॥

कारिका २०-२१. हनिग्रहि..... वर्तमानं तु सम्प्रति ॥

वृत्तिः—हनिग्रहिदृशिभ्यश्च स्वरान्तेभ्यश्च धातुभ्यो विभाषया इण्वदिट् भवति। हन्ता घानिता देवदत्तेन। हन्ता घानिता शत्रुर्देवदत्तेन। एवं ग्राहिता, ग्रहिता; दर्शिता, द्रष्टा; हनिष्यते, घानिष्यते; अघानिष्यत, अहनिष्यत; अघानिषाताम्, अवधिषाताम्; घानिषीष्ट, वधिषीष्ट। [2]**अतिपत्तिरित्य दिः**। क्रियातिपत्तिः। **परोक्षा** ह्यस्तन्यद्यतन्य एताश्चतस्रो विभक्तयः स्वसंज्ञा विशेष्यते, अतीतकाले स्युः। कारणसामग्रीवैकल्यात् क्रियाया अतिपत्तन[3]सम्भवः। क्रियातिपत्तिः—एधांस्यलभ्यत। ओदनमपक्ष्यत्। अपितु वैभवमभूत्[4]। अक्ष्णां परः परोक्षः। इन्द्रियाणामविषय इत्यर्थः। कंसं जघान कृष्णः। जहार सीतां दशाननः। ह्यो भवः कालो ह्यस्तनः। रामो वनमगच्छत्। अद्यभवोऽद्यतनः। अकार्षीत् कटं देवदत्तः। **वर्त्तमानेत्यादि**। सम्प्रतिशब्दो वर्त्तमानार्थः। वर्त्तमाने काले वर्त्तमानविभक्तिर्भवति। वर्त्तत इति वर्त्तमानः, प्रारम्भापरिसमाप्तः[5]। राजा शत्रुं जयति ॥२४॥

टिप्पणम्—... यदि पितामहो वर्षशतमजीविष्यत् नव दश वा पितृव्या अभविष्यन्। तथा चोक्तम्—

---

१. चणावि०। २. अत्तिपत्ति०। ३. अत्तिपत्तन०।
४. ०मभूत। ५. ०माप्त।

कृतस्यास्मरणे कर्त्तुरत्यन्तापह्नवेऽपि च ।
दर्शनादेरभावे च त्रिषु विद्यात् परोक्षताम् ॥

नाहं कलिङ्गं जगामेति । अत्यन्तापह्नवेऽपि—रामो वनमगच्छदित्यादि, अगमद्[1] वा ।

प्रारम्भादसमाप्तेश्च यावन्नो नश्यति क्रिया ।
तावद्वर्त्तत इत्यस्माद् वर्त्तमानोऽभिधीयते ॥

कारिका २१-२२. भविष्यति·····विभाषया ॥

वृत्तिः—भविष्यतीत्यादि । अनागतः कालो भविष्यत् । भविष्यति काले भविष्यती विभक्तिर्भवति । [2]बलिरिन्द्रो भविष्यति । **आशीरित्यादि** । अनागतस्येष्टार्थस्य आशंसनमाशीः । आशीर्विभक्तिरप्यर्थतः । कोऽर्थः ? वशात् स्वसंज्ञावलाद्, भविष्यति काले भवति वा । पुत्रो मे भूयात् । **श्वस्तन** इत्यादि । श्व इत्यागामि अनन्तरो दिवस उच्यते । श्वोभवः कालः श्वस्तनः । श्वस्तने भविष्यति नित्यं श्वस्तनी विभक्तिर्भवति । श्वः कटः कटं, भवान् भविता (?) । **सैवेत्यादि** । सैव श्वस्तनी श्यस्तनादन्यत्र भविष्यति काले विभाषया भविष्यति । एषोऽहं गन्तास्मि गमिष्यामि[3] वा ॥२५॥

कारिका २२-२३. विध्यादौ सप्तमी·····गोचरात् ॥

वृत्तिः—विध्यादावित्यादि । विधिनिमन्त्रणाध्येषणसम्प्रश्नप्रार्थनप्रेषणप्राप्तकाला विध्यादयः । विध्यादौ सप्तमी पञ्चम्यपि भवति । **विधौ**—अग्निहोत्रं जुहुयात् स्वर्गकामः जुहोतु वा । **निमन्त्रणे**—इह भुञ्जीत, इह भुङ्क्तां भवान् । **आमन्त्रणे**—इहासीत, इहास्तां भवान् । **अध्येषणे**—माणवकमध्यापयेत्, अध्यापयतु भवान् । **सम्प्रश्ने**—किं नु खलु भोः व्याकरणमधीयीत, किं नु खलु भोः व्याकरणमध्यैत उत छन्दोऽध्यापय । **प्रार्थने**—दद्यान्नो भिक्षाम्, ददातु वा । **प्रेषणे**—प्रेषितस्त्वं ग्रामं गच्छ, गच्छेर्वा । प्राप्तकाले—प्राप्ते फाल्गुने नृत्येयुः कौतुकिनः नृत्यन्तु वा । **अन्वित्यादि** । अनुज्ञामाशिषि च सेत्यनन्तरात् पञ्चम्येव भवति । **अनुमतौ**—कटं

---

१. अगम वा । २. वलि० । ३. गमिष्यति ।

कुरु। **आशिषि च**—जीवतु भवान्। **शब्दान्तरस्येत्यादि**। वर्त्तमानाद्या विभक्तयः शब्दान्तरस्य योगे। कोऽर्थः? शब्दान्तरसम्बन्धे स्वगोचरात् स्वविषयादन्यत्रापि भवति। दहतिस्म त्रिपुरं दग्धवान्[1] इत्यर्थः। [2]**इति त्याद्युद्देशः** ॥२६॥

टिप्पणम्—तत्रायं संग्रहः। तथा च—

मास्म शब्दप्रयोगेन नत्वो नन्वोर्विभाषया।
वर्तमाना विभक्तिस्तु स्मृता भूतार्थवाचिनी॥
... ...
धातोरद्यतनी ने (?) ज्ञा मा योगे तु भविष्यति।
... ...
तथा मास्मप्रयोगेऽपि ह्यस्तनी चा त (?) द्यतन्यपि।
... ...
नित्यं तावत्पुरायोगे कदाकर्ह्योर्विभाषया।
लिप्सायामपि किंवृत्ते वर्त्तमाना भविष्यति॥

यावद् भुङ्क्ते नरो व्रजति। अधीष्व माणवक।[3] पुरा विद्योतते विद्युदित्यादि।

कारिका २४. भावे कर्मणि·····भावकर्मणोः॥

वृत्तिः—भाव इत्यादि। तव्यानीयध्यण्क्यप् एते कृत्याः कृत्प्रत्ययाः भावे कर्मणि च स्युर्भवन्तीत्यर्थः। अकर्मकाद् भावे, सकर्मकात् कर्मणि। स्थातव्यं स्थानीयं स्थेयं (वा) देवदत्तेन। शयितव्यं शयनीयं शय्यं वा त्वया। कर्मणि—कर्त्तव्यः कार्य्यः कृत्यः (वा) कटो देवदत्तेन। **कर्मकर्त्तरि** इत्यादि। केलिमः प्रत्ययः कर्त्तरि स्यात्—स्वयमेव भिद्यन्ते भिदेलिमाः माषाः, पचेलिमास्तण्डुलाः। **अन्यत्रापीत्यादि**। कृत्याः भावकर्मभ्यामन्यत्रापि कृत्या लक्ष्यानुरोधाद् भवन्ति। कर्त्तरि—वास्तव्यो देवदत्तः। भवतीति भव्योऽङ्गुरः। शिष्यो माणवकः। प्रवचनीयो गुरुः। जायत इति जन्योऽङ्कुरः। आप्लवत इति आप्लाव्यो घटः। स्नानीयं चूर्णम्। दानीयो ब्राह्मण इत्यादयः। **खलर्थावित्यादि**—खलयूखलर्थौ भाव-

---

१. दह्यवान्। २. इत्याद्युः। ३. मानवक।

कर्मणोः स्याताम्--ईषदनायासेन शय्यते ईषच्छय्यम् ।[1] दुःखेन शय्यते इति दुःशय्यम् । सुखेन शय्यते इति सुशय्यम् । ईषत्करो भवता कटः । एवम्—दुष्करः, सुकरः । ईषत्पानःसोमो ब्राह्मणेन । एवम्--दुष्पानः,[2] सुपानः । पुनरपरोऽपि खलभावे—ईषदनायासेनाढ्येन भूयत इति ईषदाढ्यंभवम्, भवता दुःखेनाढ्यं भूयते इति दुराढ्यंभवम्, ईषदनायासेन पण्डितं क्रियते इति [3]ईषत्पण्डितंकरः प्राज्ञो गुरुणा । दुःपण्डितंकरो सुपण्डितंकरो युक्तः ॥२७॥

कारिका २५. भावकरणयोः·····दृश्यतेः ॥

वृत्तिः—भावकरणयोरित्यादि । आशितशब्दोपपदे भवतेर्भावे करणे च खः स्यात् । आशितस्य भवनम् आशितम्भवम् । आशितम्भवत्यनया आशितम्भवा । पञ्चपुलीरव्युडित्यादिकृञः करणे ख्युट् स्यात् । नग्नंकरणम् । द्यूतङ्करणम् । पलितङ्करणम् । तैलम्प्रियम् । करणङ्गीतम् । **व्याप्य** इत्यादि । **दृश्यतेः** । कोऽर्थः? दृशधातोर्व्याप्ये । कोऽर्थः ? कर्मणि टक्सकौ स्याताम्, क्विप् च स्यात् । समान इव दृश्यते सदृशः । सदृक्षः । सदृक् । अन्य इव दृश्यते अन्यादृशः । अन्यादृक्षः । अन्यादृक् ॥२८॥

कारिका २६. गत्यर्थात्·····भावयोः ॥

वृत्तिः—गत्यर्थादित्यादि । गत्यर्थाद् धातोर्भूते, कोऽर्थोऽतीतकाले भावाप्याधारकर्त्तृषु क्तः स्यात् । भावे—शायितं तेन तस्य वा कर्मणि । गतो ग्रामो देवदत्तेनेति । आधारे—अधिगतो ग्रामो देवदत्तस्य । कर्त्तरि—गतो ग्रामं देवदत्तः । **अव्याप्यादित्यादि** । अव्याप्यादकर्मकाद्धातोः कर्त्तरि क्तः स्यात् । कर्त्तरि—स्थितो देवदत्तः । आधारे—स्थितो ग्रामो देवदत्तस्य । भावे—स्थितं देवदत्तेन देवदत्तस्य वा ॥२९॥

कारिका २७. भावाधिकरणे·····कर्मकात् ॥

वृत्तिः—भावेत्यादि । भक्षार्थाद्धातोर्भावेऽधिकरणे च व्याप्ये । कोऽर्थः ? कर्मणि क्तः प्रकीर्तितः कथित इत्यर्थः । भावे—भक्षितं देवदत्तेन देवदत्तस्य (वा)। अधिकरणे—भक्षितं [4]भोजनमोदनस्य विप्रेण । कर्त्तरिकर्मणोः षष्ठी । कर्मणि

---

१. इषच्छयम् । २. दुष्पान । ३. इषत्० । ४. भाजन० ।

—भक्षित ओदनो भवता । **भावमात्र** इत्यादि । अविवक्षितकर्मकाद् धातोर्भावमात्रे पुनः स्यात्—कृतं देवदत्तेन देवदत्तस्य वा ॥३०॥

कारिका २८. श्लिषः शीङो·····कर्मणि स्मृतः ॥

वृत्तिः—श्लिष इत्यादि । श्लिषशीङ्वस् जृष् आस स्था जन रुह—एभ्यः परस्त्रिषु भावकर्मकर्तृषु क्तः स्यात् । श्लिषादयः सोपसर्गाः सकर्मकाः । भावे—आश्लिष्टं देवदत्तेन देवदत्तस्य (वा) । कर्मणि—आश्लिष्टा कन्या देवदत्तेन । कर्तरि—आश्लिष्टः कन्यां देवदत्तः । अधिशयितः खट्वां भवान् । अनूषितो गुरुं भवान् । अनुजीर्णो वृषली भवान् । उपासितं गुरुं भवान् । अनुजातो माणवको माणवकेन । आरूढो वृक्षं भवान् । कर्मणि—अधिशयिता खट्वा भवता । अनुशयितो गुरुर्भवता । अनुजीर्णा वृषली भवता । उपस्थितो गुरुर्भवता । अनुजातो माणवको माणवकेन । आरूढो वृक्षो भवता । भावे—अधिशयितं देवदत्तेन देवदत्तस्य वा । इत्यादयः । **तथारम्भ** इत्यादि । आरम्भे । कोऽर्थः ? आदिक्रियायां तथा भावकर्मकर्तृषु क्तः स्यात् । प्रशब्द आदिक्रियाद्योतकः । प्रकृतः कटं भवान् । भावे—प्रकृतं भवता भवतो भवतो (?) वा । कर्मणि—प्रकृतः कटो भवता । **शेषेभ्य**इत्यादि । उक्ताद् अन्ये शेषाः । शेषेभ्यो कर्मणि क्तः स्मृतः—कृतः कटो देवदत्तेन । ग्रहीतं धनं देवदत्तेन ॥३१॥

कारिका २९. अनन्तरविधेयो·····कारके ॥

वृत्तिः—अनन्तरेत्यादि । अस्य क्तप्रत्ययस्यानन्तरविधेयः । कोऽर्थः ?समीपविहितः क्तवतुप्रत्ययः, सर्वस्माद् धातोरतीतेऽर्थे कर्तरि भवति । यथा—ग्रामं गतवान् । भूतवानङ्कुरः । ओदनं भुक्तवान् । स कटं चिकीर्षितवान् वृषलः । प्रियामाश्लिष्टवान् नृपतिः । एवमन्येऽपि । **बहुघञादयोरिति** । घञ्क्तियुट् अल्[1]प्रत्ययाः । प्रत्यया बाहुल्येन स्युः । भावः, पाकः, रागः इत्यादिघञः । भूतिः, गतिः, शक्तिः इत्यादिषु क्तिः । शयनम्, वर्द्धनम्, स्थानम् इत्यादिषु युट् । जयः, नयः, गमः, भवः, दरः, वरः इत्यादिष्वल् ।[2] **केऽपीत्यादि** । तेषु घञादिषु मध्ये केऽपि प्रत्ययाः कारके भवन्ति । भुज्यते इति भोगः, दायः, लाभः एतेषु कर्मणि घञ् । जीर्य्यतेऽनेनेति जारः । दीर्य्यते एभिरिति दाराः ।

१, २. अल ।

रज्यतेऽनेनेति रागः, इत्यादिषु करणे घञ् । अपादाने—उपाध्यायः—इङो-घञ्नदादौ विभाषास्त्रियाम् । उपाध्याया, उपाध्यायी । अधिकरणे—आधारः, वासः, शयनम् । दानम्, परिधानम्—कर्मणि युट् । पानम्, नयनम्, श्रवणम्, खेलनीकरणम्—करणे युट् । सम्प्रदानं सम्प्रदाने । अपादाने (अपादानम्) स्थानम्, आसनम् अधिकरणे । भक्तिः, कृतिः, इष्टिः कर्मणि क्तिः । धृतिः, स्तुतिः, वृत्तिः करणे कृतिः । अपादाने सम्भूतिः । अधिकरणे प्रभवः । अपादाने अल् ॥३२॥

कारिका ३०. द्रव्यकृद्भावः·····कृताः ॥

वृत्तिः—द्रव्यवदित्यादि । कृद्भावो द्रव्यवद्भवतीति । तेन द्रव्यवद्भाव-विधानेन द्विवचनाद्यपि भवति । पाकः, पाकौ, पाकाः । एवं स्त्रियाम् ।[1] कर्मा-दावपि । **प्राय** इत्यादि । प्रायो बाहुल्येनाभिव्याप्तौ सत्यामपि । कोऽर्थः ? कर्मविवक्षायां द्रव्यवद्भावेऽर्थे विहिताः कृत्प्रत्यया भवन्ति । पटुः [2]कम्बलमादाय देशान्तरं गच्छति । स्वर्गमापादयितुम् अग्निष्टोमेन यजते । स्वादुङ्कारमोदनं भुङ्क्ते । चौरंकारमविनीतमाक्रोशति चातिकुपितः । प्राय इतिवचनादोदनस्य पाकः, शत्रूणां विजयः, पयसां पानम् ॥३३॥

कारिका ३१. एकः कर्त्ता·····क्रियापरा ॥

वृत्तिः—एक इत्यादि । कर्त्ता चेदेकः, क्रिया चेदनेका तदा पूर्वकालतः । कोऽर्थः ? पूर्वस्मिन् काले भावेऽर्थे क्त्वाणमिञो भवन्ति । रिपून् जित्वा [3]नरपतिः (आयाति) । पुस्तकं लिखित्वा छात्रः पठति । भुक्त्वा पीत्वा[4] व्रजति । भावं भावं जलबुदबुदा इव सम्पदो विद्यन्ते । पायं पायं मधूनि माद्यन्ति भृङ्गाः । लवणंकारं भुङ्क्ते । **अमुष्मिन्नित्यादि** । अमुष्मिन् पूर्वोक्ते भावेऽर्थे धातोः तुम् भवति । **अपरान्या** क्रिया चेत्तदर्था भवति । कटं कर्त्तुं [5]वीरणान्यानयति कर्मकारः । पक्तुम् ओदनं काष्ठान्युत्पादयति । आहरति द्रष्टुं चक्षुः, योद्धुं धनुः इत्यादिषु [6]कटौदनचक्षुरादीनां करणपचनदर्शनादिना [7]आनयनोत्पा-दनभवनादिका अन्या क्रिया इति तुमर्विषयता ॥३४॥

---

१. त्रि वि (?) । पार्श्वे स्त्रियाम् इत्युल्लिखितः । २. संबल० ।
३. नरयति । ४. पित्वा । ५. विरणा० ।
६. कटोदनं चक्षु० । ७. आनयो० ।

कारिका ३२. वुण्तृच्····· क्रियान्तरे ॥

वृत्तिः—वुणित्यादि । सर्वे वुण्तृच्प्रभृतयः कर्तृवाचिनो दृश्यन्ते । करोतीति कारकः । पचतीति पाचकः । कर्त्ता, हर्त्ता, चेता, स्तोता । पचः, पठः, विदः । **शतृशानेत्यादि ।** शतृशानौ क्वसुश्च—एते प्रत्ययाः क्रियान्तरैः सापेक्षाः स्युः । ओदनं पचन् सूपकारो गायति, पचमानः वा[1] । ओदनं पचन्तं पचमानं वा छात्रं पश्यामि । ओदनं पचता पचमानेन वा छात्रेण किञ्चित्क्रियते । ओदनं पेचिवान् सूपकारस्तथौदनं पेचिवांसं सूपकारं पश्यामीति ॥३५॥

कारिका ३३-३४. कृतो धात्वर्थ·····विभक्तयः ॥

वृत्तिः—श्लोकार्धं **कृत** इत्यादि । धात्वर्थानां सम्बन्धे विशेषणविशेष्यभावलक्षणे स्वं कालं त्यक्त्वा विशेषणानि कृतः कृत्प्रत्ययाः कालान्तरवाचिनः स्युः विशेष्यस्य काले साधवो भवन्ति । अग्निष्टोमयाजी पुत्रोऽस्य जनिता । अभूतः कटो ह्यो भवता, भाविकृत्यमासीत् । धावन् गतः । इति श्लोकार्धम् । **इति कृदुद्देशः ।**

यत्रार्थ इत्यादि । ते त्यादिप्रभृतयः त्यादिकृत्तद्धितसमासा यत्रार्थे नो विधीयन्ते सोऽनुक्तस्तत्र कर्मादौ द्वितीयाद्याविभक्तयो, **यथायथम्** सन्धं संबन्धमपि कारके भवन्ति । तद्यथा—कटं करोति । कटं कृतवान् देवदत्तः । देवदत्तेन क्रियते । त्वया कृतम् । ईश्वरेण दत्तवरो रावणस्त्रिभुवनं जिगाय । परशुना छिनत्ति । शापेनास्तम्भितमहिमा यक्षः । ब्राह्मणाय ददाति । देवाय दत्तवान् । वृक्षात् पर्णं पतति । उपाध्यायादधीते माणवकः । राज्ञः पुरुषो गच्छति । (आश्वमेधीको ब्रह्महत्यापी)[2] । वने वसन्ति मातङ्गाः । अधिको देवेषु ब्रह्मा । सङ्ग्राम जितं रिपुवीरः । एवमन्येऽपि कृत्तद्धितसमासाः प्रतिपत्तव्याः ॥३६॥

टिप्पणम्—तद्धितप्रत्ययो यथा—गोमानासीत्, भविता, भविष्यति वेत्यादि कर्त्तर्य्येव । यत्र यस्मिन्नर्थे त्यादितव्यादितद्धितसमासा नाभिधीयन्ते सोऽनुक्तो ज्ञेयः । तत्र कर्मादौ द्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठी सप्तम्य भवन्ति । कटं करोतीत्यादि ।

---

१. वेति पदं नास्ति । २. कोष्ठकगतोऽयमंशः ।

कारिका ३५. द्वितीयाद्या कर्मणि·····सम्प्रदानतः ॥

वृत्तिः—**द्वितीयेत्यादि**। कर्मणि कारके द्वितीया विभक्तिर्भवति—कुम्भकारः—कुम्भं करोति। [1]काष्ठं दहति। सुवर्णं कुण्डलं करोति। आदित्यं पश्यति। **तृतीयेत्यादि**। कर्त्रृकारके तृतीयाविभक्तिर्भवति—देवदत्तेन ग्रन्थोऽधीयते। **करणे तु** भवेत्सैव—दात्रेण छिन्नं लुनाति। **सम्प्रदानतः** सम्प्रदानकारके चतुर्थीविभक्तिर्भवति—ब्राह्मणाय भिक्षां ददाति। गुरवे गां ददाति। चैत्राय पात्रं ददातीति ॥३७॥

टिप्पणम्—कर्त्ता यदाऽनुक्तो भवति तदा कर्त्तरि तृतीया भवतीत्यर्थः। पाचयिता सूपकारेणौदनस्य देवदत्तः।

कारिका ३६. पञ्चमी स्यादपादाने·····न कर्त्तरि ॥

वृत्तिः—**पञ्चमीत्यादि**। अपादानकारके पञ्चमीविभक्तिर्भवति—मेघाद् भविष्यति जलम्। पर्वतादवरोहति मुनिः। **षष्ठीत्यादि**। अनुक्तसम्बन्धमात्रे षष्ठीविभक्तिर्भवति। स च सम्बन्धोऽनेकप्रकारः। स्वस्वामिसम्बन्धः—राज्ञः पुरुषः। जन्यजनकसम्बन्धे—देवदत्तस्य पुत्रः। अवयवावयविसम्बन्धे—वृक्षस्य शाखा। आश्रयाश्रयिसम्बन्धे—दुर्गस्य चौरः। [2]अपकृष्टापकर्षकसम्बन्धे—व्याधेः भैषज्यम्। साकलस्य[3] सम्बन्धे—देवदत्तस्य गौः। एवमन्येऽप्यनुवर्त्तव्याः। **कर्मेत्यादि**। कृता कृदन्तेन योगे कर्मकर्त्रोरनुक्तयोः षष्ठीविभक्तिर्भवति—कटस्य कारकः। ओदनस्य पाचकः। कर्त्तरि—भवतः शायिकाः, भवतः आशिकाः। **द्वयोरित्यादि**। द्वयोरपि कर्मकर्त्रोः एकस्मिन् प्रयोगे उभयप्राप्तौ सत्यां कर्त्तरि षष्ठी न भवति—पाचयितान्नस्य सूपकारेण देवदत्तः। कारयिता कटस्य देवदत्तेन यज्ञदत्तः। हारयिता भारस्य देवदत्तेन विष्णुमित्रः ॥३८॥

कारिका ३७. वा घञादेरकाकारे·····केवले ॥

वृत्तिः—**वा घञादेरित्यादि**। घञ् क्ति युट् अल् प्रभृतयो घञादयः। घञादेः प्रयोगे कर्त्तरि वा षष्ठी स्यात्—आश्चर्यो गवां दोहोऽगोपालेना-

---

१. काष्टं।
२. अपकृष्यापक०।
३. सकलस्य भावमिति टिप्पणी पार्श्वे भागे वर्त्तते।

गोपालकस्य वा। साधु खलु पयसः पानं[1] हंसेन हंसस्य वा[2]। विचित्रा सूत्रस्य कृतिः पाणिनिना पाणिनेर्वा। कष्टो जयस्तुरंगाणां गजबलेन गजबलस्य वा[3]। **अकाकारे** इत्यादि। अकाकारे द्वयोरपि कर्त्तृकर्मणोरियं भवति—पाचिका ओदनस्य सूपकारस्य। भिदा करिकुम्भस्य केशरिणः। **कृत्यानां** तव्यादीनां द्वयोः कर्त्तृकर्मणोरेवं षष्ठी न स्यात्—नेतव्यो नयनीयो भारो देवदत्तेन। दोग्धव्या दोहनीया दोह्या (वा) गौः पयो गोपालकेन। **वाचे**त्यादि। कृत्यानां प्रयोगे केवले कर्त्तर्यनुक्ते वा षष्ठी स्यात्—कर्त्तव्यः कटो देवदत्तेन देवदत्तस्य वा ॥३६॥

टिप्पणम्—एषां प्रयोगे सति उभयप्राप्तौ कर्त्तरि वा षष्ठी भवति। ···अक इति। भावविहितस्य वुञो गृह्यते। अकाकारी[4] स्त्री। भावविहितावेव परस्परसाहचर्यात्। अकार इति। अञोर्ग्रहणम् सामान्यनिर्देशात्। एषां प्रयोगे द्वयोरपि कर्त्तृकर्म्मणोः षष्ठी भवेद् इत्यर्थः। पाचिका सूपकारस्य ओदनस्य[5] इत्यादि। कृत्यानामित्यादि। द्वयोः कर्त्तृकर्मणोः अनुक्तयोः कृत्यानां प्रयोगे न षष्ठी।···वाचक इत्यादि। यत्र कृत्यानां कर्त्ता केवल एवानुक्तो भवति न कर्म तत्र षष्ठी वा भवति।

कारिका ३८. निष्ठोदन्ता·····च योगाद्दणे णिनेः ॥

वृत्तिः—निष्ठ इत्यादि। निष्ठोदन्ताव्ययो कञ् तृन् शत्राणक्वन्मुभिर्योगे कर्त्तृकर्मणोः सा षष्ठी न भवति – ग्रामं गतः, ग्रामं गतवान्। कन्यामलङ्करिष्णुर्जननी। जगती धनं गृध्नुः। कटं चिकीर्षुः। कटं कृत्वा ददाति। ओदनं भोक्तुं व्रजति। पयः पातुमिच्छति। ग्रामं गामुको विप्रः। सर्वं ज्ञात्वा सुगन्ता। ओदनं पचन् सूपकारस्तिष्ठति। शास्त्रं विद्वान् सभासु प्रगल्भति। शत्रुं विजयमानो राज्ञां शोभते। सूपकारेण पच्यमानेन निष्पाद्यते ओदनः। कवचमुद्वहमानी न क्षत्रियः कुमारः। कटं चक्राणः कुटुम्बी ओदनं पेचिवान् तस्थौ। **भाविनी**त्यादि। भविष्यति विहितेन इना योगे, भविष्यति विहितेन वुणा योगे च ताच्छीलिकस्य, **केश्च योगाद्दणे** विहितस्य णिने योगात् कर्त्तृकर्मणोः सा षष्ठी न भवति। ग्रामं गामी, ग्रामगामी। कटको कारको व्रजति वक्तिः (?) कटं शतंदायी ॥४०॥

---

१. यानम्। २, ३. वेति पदं नास्ति। ४. ०कारौ। ५. उन्दनस्य।

टिप्पणम्—कर्म्मकर्त्रोः कृतां योगे प्रतिषेधोऽयम्। क्तक्तवन्तुउदन्तइष्णुच्स्नुक्तृषुअव्ययेतिक्वाणनमतुम्उरउकञ्तृणशन्तृङ्आलआनशशानङ्कानक्वन्सु—एभिर्भविष्यति। विहितेन इना एवंविधेन च वुणा, ताच्छीलिकस्य कः विन् विषयेऽपि णिनेश्च योगात् कर्मणि कर्त्तरि षष्ठी न भवतीत्यर्थः।

कारिका ३९. वा तु कर्त्तरि·····तथा॥

वृत्तिः—वात्वित्यादि। भावे विहिते वते कर्त्तरि वा षष्ठी स्यात्—कोकिलानां कोकिलैर्वा[1] कूजितं मधुरम्। शतृ इति। शतृयुक्तस्य द्विषः कर्मणि षष्ठी वा भवति—द्विषन् चौरं चौरस्य वा। **कृञ्** इत्यादि। कृञो यत्ने कृदाख्याते कृदाख्यातयोः प्रयोगे प्रति प्रतियत्ने गम्यमाने करोतेः कर्मणि वा षष्ठी भवति—सतो गुणाराधनं प्रति यत्नम्। अंगानाम् अंगानि वा चोपस्कुर्वाणः। हृञ इत्यादि। हरते करोतेश्चानुकृतौ गम्यमानायां तथा कर्मणि वा षष्ठी भवति—पितृमुखं[2] पितृमुखस्य[3] वाऽनुहरति कन्या धन्या भवति। चन्दनं चन्दनस्य वाऽनुकर्त्तुमुदयद्गन्धः॥४१॥

टिप्पणम्—शतृङाक्तस्य द्विषः कर्मणि षष्ठी वा भवति। ···कृदाख्यातयोः प्रयोगे प्रतियत्ने गम्यमाने करोतेः[4] षष्ठी वा भवति। ·····हरतेः करोतेश्च अनुकरणेऽर्थे। ·····पितुरलङ्कृत्य गुणैरात्मानं सम्भावयति पितरं वा।

कारिका ४०. स्मृतिर्हिंसार्थं·····कर्त्तृकर्मणोः॥

वृत्तिः—स्मृतिर्हिंसा इत्यादि। स्मृतिर्हिंसार्थयोर्धातोरेवं कर्मणि षष्ठी वा स्यात्—पुत्रो मातुः स्मरति मातरं वा। राजा चौरस्य[5] ऋच्छति चौरं वा। तृप्त्यर्थस्य धातोः प्रयोगे करणे वा षष्ठी स्यात्—फलानां फलैर्वा तृप्तये पथिको[6] गच्छति। **आधारेत्यादि**। अधिकरणे वर्त्तमाने च विहितस्य क्तस्य कर्त्तृकर्मणोः सा षष्ठी स्यात्—राज्ञः न भुक्तमोदनस्य भाजनम्। मानामभिप्रेतो गुणी सर्वेषां पूजितो गुरुः॥४२॥

---

१. वेतिपदं नास्ति। २. द-मुखं, मुखस्य। ४. करोतिः।
५. चोरस्य। ६. यदिको।

कारिका ४१. आधारे सप्तमी·····यत्क्रिया ॥

वृत्तिः—आधार इत्यादि । आधारे । कोऽर्थः ? अधिकरणे सप्तमी ज्ञेया । औपश्लेषिको—देवदत्तः कटे आस्ते । अभिव्यापको—तिलेषु तैलम् । वैषयिको—दिवि देवाः सन्ति । सामीप्यको—गङ्गायां घोषः । **निमित्तादित्यादि** । निमित्तात्कर्मयोगतः । कोऽर्थः ? कर्मणः प्रयोगे सप्तमी स्यात्—"चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥" **क्तस्येत्यादि** । इन प्रकृतेःक्तस्य व्याप्ये कर्मणि सप्तमी स्यात्—व्याकरणे अधीती छात्रः । उपकृती सत्त्वेषु सत्पुरुष. । **क्रियेत्यादि** । यस्योक्तस्य कारकस्य क्रिया क्रियान्तरस्य चिह्नं लक्षणं भवति, तस्मात् सप्तमी भवति—वृषलेषु आसीनेषु ब्राह्मणा भुञ्जन्ते[1] । गोषु दुह्यमानासु श्वागतः । उदयमाने चन्द्रमसि कुमुदानि विकसन्ति । अस्तङ्गम्यमाने भास्वति विघटन्ते चक्रवाकमिथुनानि ॥४३॥

कारिका ४२. ततश्चानादरे·····समयादिभिः ॥

वृत्तिः—ततः सानादर इत्यादि । यस्योक्तस्य कारकस्य क्रिया क्रियान्तरस्य चिह्नं भवति तस्मादनादरे गम्यमाने षष्ठी सप्तम्यपि भवति—रुदति पोते पुष्करा (?) गच्छन्ति । गच्छति पिता रुदतः पोतस्य वा । **निर्धारणे** इत्यादि । निर्द्धार्य्यते पृथक्क्रियते यस्मात् समुदायादेकदेश, तन्निर्धारणम् । **निर्धारणात्तथेति**—षष्ठीसप्तम्यौ भवतः—पुरुषाणां पुरुषेषु वा क्षत्रियः शूरः । **कर्मेत्यादि** । कर्मक्रियां प्रोक्तवन्तः कर्मप्रवचनीयाः, अभि-प्रति-परि-अनु-उप एते पूर्वाचार्यसंज्ञाप्रसिद्धाः । एभिर्योगे लिङ्गात् द्वितीया भवति । लक्षणेत्थम्भूते अभिभागे च परि-प्रति-अनु एषु सहार्थेषु । हीने उपश्च कथ्यते । वृक्षमभिविद्योतते विद्युत् । वृक्षं वृक्षमभितिष्ठति साधुर्देवदत्तो मातरमभियदत्र (? मभिवदन्न) मां परि स्यात् । समया-निकषा-हा-धिक्-अन्तरा-अन्तरेण एते समयादयः । एतैर्योगे लिङ्गात् द्वितीया भवति—समया ग्रामम् । निकषा ग्रामम् । हा देवदत्तम् । धिक् देवदत्तम् । अन्तरा गार्हपत्यं चाहवनीयं च वेदिः । अन्तरेण पुरुषकाणं न किञ्चिल्लभ्यते ॥४४॥

टिप्पणम्—राज्ञो मतश्चाटुकारः । स्त्रीणामिष्टः प्रियतमः ।

---

१. भुञ्जते ।

कारिका ४३. उपर्यादिभि·····युतात् ॥

वृत्तिः—उपर्येत्यादि । [1]उपरि-अधः-अधि एते उपर्य्यादयः । [2]कृत्तद्धित-वचनैर्योगे लिङ्गात् द्वितीया भवति—उपर्यूपरि ग्रामम् । अधोऽधो नगरम् । अध्यधि स्थापयति । **उभयादिभिरित्यादि** । उभय-सर्व-अभि-परि एते उभयादयः । एभिस्तसं, तैर्योगे लिङ्गात् द्वितीया भवति—उभयतो ग्रामम् । सर्वतो ग्रामम् । अभितो ग्रामम् । परितो ग्रामम् । **प्रतिनिधाविति्यादि** । मुख-सदृशः । प्रतिनिधौ परिवर्त्ते चार्थे प्रतिशब्देन युक्तात् लिङ्गात् पञ्चमी भवति —अभिमन्युरर्जुनतः प्रति । अर्जुनस्य सदृश इत्यर्थः । माषानस्मै दत्त्वा तिलेभ्यः प्रतियच्छति । माषानस्मै ददाति तिलानि ग्रहीतुमित्यर्थः ॥४५॥

कारिका ४४. अधिना सप्तमी·····प्रयोगतः ॥

वृत्तिः—अधिनेत्यादि । अधिशब्देन युक्तात् स्वाम्यर्थे सप्तमी भवति— अधिब्रह्मदत्ते पाञ्चालः । सुखं भवन्ति ब्रह्मदत्तस्य स्वामिन इत्यर्थः । अधि-पञ्चालेषु[3] ब्रह्मदत्त इति । **उप** इत्यादि । उपशब्देन [4]युक्तादधिकेनेतिरिक्तात् (? ०नेत्यर्थकात्) सप्तमी भवति—उपखार्य्यां द्रोणः । चतुराढको द्रोणः । चतुर्भिर्द्रोणै खारि । [5]**तृतीयेत्यादि** । पृथक् नाना प्रयोगे लिङ्गात् तृतीया पञ्चमी भवति—पृथक् देवदत्तेन । पृथक् देवदत्तात् । नाना देवदत्तेन । नाना देव-दत्तात् ॥४६॥

कारिका ४५. स्तोकादेः·····सम्प्रदानतः ॥

वृत्तिः—स्तोकादेरित्यादि । स्तोक-कृच्छ्र-अल्प-कतिपय एते स्तोकादयः । एभ्योऽसत्त्ववाचिभ्यो धर्मवाचिभ्यः करणे पञ्चमी भवति - स्तोकान्मुक्तः । अल्पान्मुक्तः । कृच्छ्रादागतः । कतिपयाद्विस्तीर्णः । सत्त्ववाचिनस्तु भवति— स्तोकेन विशेषेण हतः । **ऋणादित्यादि** । हेतुभूतात् ऋणात् पञ्चमी भवति— सहस्राद् बद्धः । शताद् बद्धः । **गुणादित्यादि** । द्रव्याश्रयो[6] गुणः । गुणाद्धेतु— भूतात् पञ्चमी वा भवति—मोहाद् बद्धः, मोहेन वा । ज्ञानान्मुक्तः ज्ञानेन वा । **यदित्यादि** । यदर्थं[7] किञ्चिदेव स्याच्चतुर्थी सम्मता[8] ततः—यूपाय दारु । कुण्डलाय हिरण्यम् ॥४७॥

---

१. उपपरि । २. कृतद्धिर्वचनै० । ३. ०पञ्चालिषु । ४. ०दाधिके० ।
५. तृतीयेत्यादि । ६. द्रव्याप्रायो । ७. यदर्थ । ८. समंता ।

[1]**अनभिहिते कर्त्तरि** तृतीया षष्ठी च—लोकः क्रियते विष्णुना । वैष्णवस्य वैष्णवेन वा सेव्यो हरिः । **अनभिहिते कर्मणि** द्वितीयातृतीयाचतुर्थीषष्ठी चेति चतस्रो भवन्ति—ग्रामं गच्छति नरः । पुत्रेण सञ्जानीते पिता । ग्रामाय व्रजति नरः । ग्रामं गतो देवदत्तः । **करणे** तृतीयापञ्चमीषष्ठी चेति तिस्रो भवन्ति—चक्रेणासुरं छिनत्ति हरिः । स्तोकान्मुक्तः । घृतस्य सञ्जानीते मित्रम् । **सम्प्रदाने** षष्ठीचतुर्थीतृतीया चेति तिस्रो भवन्ति—पुरुषः मृगश्चन्द्रमसो दातव्यः । क्षुधितायान्नं ददाति । दास्या मालां दिशति कामुकः । **अपादाने** पञ्चम्येव नान्या । **सम्बन्धे** षष्ठ्येव नान्या । **अधिकरणे** सप्तम्येव नान्या ॥७॥

टिप्पणम्—करणे भूतात् **ऋणात्**पञ्चमी भवति । हेत्वर्थतृतीयापवादः । ·····किञ्चिद् वस्तु क्रियार्थं तत्र चतुर्थी ।

कारिका ४६. यस्मै कुप्यति·····विभाषया ॥

वृत्तिः—**यस्मायित्यादि** । यस्मै कुप्यति तस्मात् चतुर्थी भवति—छात्राय क्रुध्यति, छात्राय कुप्यति । **नम** इत्यादि । नमः-स्वस्ति-स्वाहा-स्वधा-अलं-वषट् एते नम आदयः । एभिर्योगे लिंगात् चतुर्थी भवति—नमो देवेभ्यः । स्वस्ति प्रजाभ्यः ।अग्नये स्वाहा ।[2] स्वधा पितृभ्यः । अलं मल्लो मल्लाय । समर्थो मल्लो मल्लाय । वषट् इन्द्राय । **व्याप्य** इत्यादि । गत्यर्थानां धातूनां व्याप्ये कर्मण्यध्ववर्जिते चेष्टायां परिस्पन्दने[3] चतुर्थी भवति, पक्षे यथाप्राप्तं द्वितीयापि । ग्रामाय गच्छति, ग्रामं गच्छति । चेष्टायामिति किम् ? मनसा स्वर्गं गच्छति । अनध्वनीति किम् ? अध्वानं गच्छति । पन्थानं गच्छति । गतेः साहचर्याद् द्विकर्मकाणां न स्यात्—अजां ग्रामं नयति ॥४८॥

टिप्पणम्—·····ग्रामाय ग्रामं वा दत्त्वा तीर्थं व्रजति ।

कारिका ४७. विना युक्तात्·····च युक्ततः ॥

वृत्तिः—**विनेत्यादि** । विनायुक्ताच्च इयं द्वयी—द्वितीयापञ्चमी स्यात्, विशेषतस्तृतीया च—विना वातम्, विना वातात्, विना वातेन वर्षति देवः ।

---

१. वृत्तिभागोऽयं मातृकायां स्वतन्त्ररूपेण वर्त्तते क्रमाङ्कश्च ७ इत्यस्ति । स तु सप्तम-कारिकया न सङ्गच्छते ।

२. पदमिदं नास्ति । ३. चेष्टापरिस्पन्दते ।

तृतीयेत्यादि । लक्षणे हेतौ च द्वयोरपि तृतीया भवेत् । लक्ष्यतेऽनेनेति लक्षणम् । उपवीतेन[1] ब्राह्मणः । जटाभिस्तापसः । एवम्—अक्ष्णा काणः । पादेन खञ्जः । हेतौ—धनेन कुलम् । विद्यया यशः । **सहेत्यादि** । क्रियागुणद्रव्यैः सहभावः । साकं सार्द्धं समं सहितं सजुः सह अमी—एते सहार्थाः । सहार्थेन योगे लिंगात्तृतीया भवति—पुत्रेण सहागतः । पुत्रेण सह स्थूलः । पुत्रेण सह गोमान् । एवं क्रमेण साकमित्यादयः ॥५०॥

कारिका ४८. मन्यतेरप्य·····द्वयी ॥

वृत्तिः—मन्यतेरित्यादि । मन्यते नावादिवर्जिते कर्मणि चतुर्थी भवति, अनादरः कुत्सा यदि प्रतीयते द्वितीया च—न त्वां तृणं मन्ये, न [2]त्वां तृणाय मन्ये । न त्वां[2] वुषं मन्ये, न त्वां[2] वुषाय मन्ये । युष्मदश्चतुर्थी नेष्यते, अस्मादपि कुत्सामानात् । त्रैलोक्यराज्यमपि देव तृणाय मन्य इति । **अनादर** इति । अस्मान् द्वषदं मन्ये । प्राणिसंज्ञा नावादेरिति । नावादौ न भवति—न त्वां[2] नावं मन्ये । न त्वां[2] अन्नं मन्ये । न त्वां[2] काकं मन्ये । न त्वां[2] शृगालं मन्ये । एते नावादयः । **पञ्चमी स्यादित्यादि** । ऋतेशब्दयोगात् पञ्चमी द्वितीया च—इयं द्वयी भवेत्[3]—ऋते देवदत्तात् देवदत्तं वा ॥४९॥

कारिका ४९. षष्ठी स्याद्धेतुना·····प्रयोगतः ॥

वृत्तिः—षष्ठीत्यादि । हेतुशब्देन युक्तात्लिंगात् षष्ठी भवति—अन्नस्य हेतोर्ग्रामे वसति । अध्ययनस्य हेतोरध्यापकमाराधयति । **सर्वा** इत्यादि । सर्वनाम्नो हेत्वर्थाद्यैर्युक्तात् लिंगात् सर्वा विभक्तयो भवन्ति । को हेतुः, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः, कस्य हेतोः, कस्मिन् हेतौ, कुग्रामे वसति । कर्मादीनामित्यादिप्रयोगतो विधानात् कर्मकर्तृकरणसम्प्रदानापादानसम्बन्धाधिकरणानां विवक्षया द्वितीयादयो विभक्तयः ऊहनीयाः । शतं व्यवहरति । शतो व्यवहरति । शतेन व्यवहरति । शताय व्यवहरति । शताद् व्यवहरति । शतस्य व्यवहरति । शते व्यवहरति ।

इतिचंगदासकृतौ सम्बन्धोद्देशे कारकोद्देशः ॥५१॥

---

१. उपर्चतेन ।
२. त्वा ।
३. भवेत ।

कारिका ५०. समस्यन्ते द्वितीयाद्या·····तत्परं बहुः ॥

वृत्तिः—समस्यन्ते इत्यादि। द्वितीयाद्या विभक्तयो नाम्ना परपदेन समस्यन्ते। समासस्तत्पुरुष इत्युक्तः। तस्मिन् तत्पुरुषे यत् परं तत् प्रायो बाहुल्येन परं स्यात्, क्वचित्पूर्वमपि। कष्टं श्रितः कष्टश्रितः। [1]दुःख-प्राधान्यार्थः ॥५२॥

टिप्पणम्—कर्मणि—कष्टंश्रितः इत्यादि। तृतीया यथा—नखरैर्भिन्नः। चतुर्थी—यूपाय दारु यूपदारु। पञ्चमी—देवाद्भयं देवभयम्। षष्ठी—राज्ञः पुरुषः राजपुरुषः। सप्तमी—अक्षेषु शौण्डः अक्षशौण्डः। बह्विति। प्रायश[2] इत्यर्थः। तेन तत्पुरुषेऽस्मिन् क्वचिदेवं पूर्वमपि निपतति। प्राप्तो जीविकां प्राप्तजीविकः इत्यादि।

कारिका ५१. विशेषणं विशेष्येण·····विशेषणम् ॥

वृत्तिः—विशेषणमित्यादि। यत्र विशेषणं विशेष्येण सह समस्यते। **तद्द्वयम्**। कोऽर्थः ? विशेषणं विशेष्यम्। यदि एकार्थं स्यात्। कोऽर्थः ? तुल्यार्थं स्यात्। स समासो कर्मधारयो ज्ञेयः। तस्मिन् कर्मधारये समासे प्रायो बाहुल्येन विशेषणसंख्येयवाचिभिः विशेष्येऽपरपदे समस्यते ॥५३॥

टिप्पणम्—अविशेषणमित्यादि। नीलोत्पलमित्यादि। क्वचित् विशेषणं परं भवति—पुरुषश्चासावुत्तमश्चेति पुरुषोत्तमः।

कारिका ५२. तद्धितार्थे समाहारे·····वाचिभिः ॥

वृत्तिः—तद्धितस्यार्थे विषयभूते अपत्येकणादिर्वर्जितस्य (१) स्वरादितद्धिते[3] चाभिधेये समाहारे वाभिधेये[4] उत्तरपदे च परतः समासो द्विगुर्ज्ञेयः—पञ्च-गुरुर्गरुप्यः (?) विषये पञ्चकपालं हविः तद्धितार्थेऽभिधेये। अपइत्यकणादीनां तु विषय एव समास इति। ते च तद्धिता भवन्त्येव। यथा—पञ्चानां नापितानाम् अपत्यं पञ्चनापितः। कणद्वाभ्यां नौभ्यां क्रीतं द्वैनाविकम्। इकण पञ्चनावं, कर्मधारये सति गोरतद्धिताभिधेयेतिराजादित्वात् पञ्चपुल्य-समाहारे अदन्तस्त्रीपात्रादिद्विपात्रं नपात्रादि ॥५४॥

---

१. दुःखप्रायधान्यार्थः।
२. प्रायस।
३. ०तद्धित।
४. ०भिधे।

टिप्पणम्—पञ्चसु ब्राह्मणेषु साधुः पञ्चब्राह्मण्यः । एवम् पञ्चकपालं हविः । पञ्चानां गवां समाहारः पञ्चगवम् । इति द्विगुः ।

कारिका ५३-५४. उभौ तत्पुरुषा····· बहुव्रीहिरुच्यते ।।

वृत्तिः—उभावित्यादि । उभौ द्विगुकर्मधारयौ तत्पुरुषावुक्तौ । किमर्थम् ? तेन तत्पुरुषसंज्ञां विना ने (?) तदाश्रयम् ? कोऽर्थः ? तत्पुरुषाश्रयं कार्यं स्यात्—महागजः । इह श्लोकार्द्धम् ।[1]

यत्रेत्यादि । यत्रानेकम् । कोऽर्थः ? द्वौ बहूनि वा यदा परस्यार्थे स्यातां स समासो बहुव्रीहिरुच्यते—निर्जितारिर्वीरः । दत्तभोजनो ब्राह्मणः । मत्त-मातंगं वनम् । अग्न्याहितादिषु विशेषणं विशेष्यमपि उभयमपि पर्यायेण पूर्वं निपततीति । अग्न्याहितः । आहिताग्निः ।।५५।।[1]

टिप्पणम्—द्विगुकर्मधारयौ । तेन तत्पुरुषाश्रयं कार्यं भवति । यत्रानेकं द्वे बहूनि वा पदानि अन्यस्यार्थे समस्यन्ते स समासो बहुव्रीहिर्ज्ञेयः । प्राप्त-मोदनं येन स प्राप्तौदनः[2] इत्यादि ।

कारिका ५४. सरूपे यदिवा·····विदिश्यपि ।।

वृत्तिः—सरूप इत्यादि । **यदि वा** । कोऽर्थः ? अथवा सरूप कोऽर्थः ? समानरूपे द्विपदे अन्यपदार्थः, स यदि समस्यते सोऽपि बहुव्रीहिरुच्यते । दिशां सम्बन्धिनि द्वे नाम्नादि (?) दिग्वाच्यायां स यदि समस्यते सोऽपि बहुव्रीहि-रुच्यते । केशाकेशि । दण्डादण्डि । दक्षिणपूर्वादिक् ।।५५।।[3]

कारिका ५५. इतरेतरयोगे च·····समुच्चये ।।

वृत्तिः—इतरेतर[4] इत्यादि । इतरेतरयोगे समाहारे च द्वयोर्नाम्नोः समु-च्चयो यः स समासो द्वन्द्वो भवेत् । स्त्री च पुरुषश्च स्त्रीपुरुषौ । स्त्रीपुरुषाः । धवखदिरपलाशाः ।।५६।।

---

१. कारिकाङ्कस्तु नात्र विद्यते । २. प्राप्तोदन ।
३. मूलकारिकायां तु न क्रमाङ्कोऽत्र । कारिकार्धश्चाग्रिमकारिकया सम्बद्धीकृतो वर्त्तते
४. इतरेतरे ।

टिप्पणम्—इतरेतरयोगो द्वन्द्वः अवयवप्रधानः । समाहारे द्वन्द्वः समुदाय-प्रधानः । समुदायस्यैकत्वादेकवचनम्, नपुंसकञ्च । यथा—स्त्री च पुरुषश्च स्त्रीपुरुषौ । समाहारे—स्त्रीपुरुषम् । प्लक्षन्यग्रोधमित्यादि ।

कारिका ५६. तस्मिन्नल्पस्वरं·····उच्यते ॥

वृत्तिः—**तस्मिन्नित्यादि** । तस्मिन् द्वन्द्वे[1] समासे द्वयोर्मध्ये यदल्पस्वरं तत्पूर्वं निपतति । तस्मिन् द्वन्द्वसमासे द्वयोर्यदर्चितं तत् प्रायो बाहुल्येन पूर्वं निपतति । प्लक्षन्यग्रोधम् । प्राय इतिवचनात्—उलूखलमुषले ।[2] देव-दैत्यौ[3] ॥५७॥

यत्रेत्यादि । यत्रासंख्यम् । कोऽर्थः ? अव्ययम् विभक्त्यादौ । कोऽर्थः ? कारकादौ, वर्त्तमानं समस्यते स समासोऽव्ययीभाव इष्यते । अधिस्त्रि[4] ॥

टिप्पणम्– प्राय इति वचनात्—उदूखलमुषले इत्यादि । बहुत्वे तु न भवति—शंखदुन्दुभिवीणा इत्यादि । विभक्त्यादौ । विभक्त्यर्थादौ अव्ययं समस्यते सोऽव्ययीभाव इति ।

कारिका ५७. षष्ठीतत्पुरुषे·····पूर्विकाः ॥

वृत्तिः—**षष्ठीत्यादि** । षष्ठीतत्पुरुषान्तः सभाशब्दो राजमनुष्याभ्यां परं क्लीवं स्यात् । शालावाचकोऽपि सभाशब्दः षष्ठीतत्पुरुषान्तः क्लीवे स्यात् । बाहुल्यपूर्वकोऽपि[5] छायाशब्दः क्लीवे स्यात्—नरपतिसभम् । चक्रवर्त्तिसभम् । राजशब्दान्न भवति—राजसभा । अमनुष्या—पिशाचसभम् । मनुष्यान्न भवति । देवसभा । **शालेति** । दासीसभम् । **छायाबाहुल्येति** । गृध्रच्छायम् । शलभच्छायम् ॥५८॥

टिप्पणम्—ईश्वरसभम् इत्यादि । अराजमनुष्याभ्यां निषेधः । तत्र राज-सभमित्यादि । गध्राणां छाया गृध्रछायम् । अबहुत्वे तु गृध्रस्य छाया गृध्रछाया ।

---

१. द्वन्द्वः । २. उलुखल्० । ३. दैव० । ४. अत्र क्रमाङ्काभावः ।
५. पूर्विकोऽपि ।

कारिका ५८. वा स्युः सेना·····प्रकाशने ॥

वृत्तिः—वास्युरित्यादि । सेना सुरा शाला निशा छाया—इमे पुनः शब्दाः षष्ठीतत्पुरुषान्ता वा क्लीवे स्युः । उपज्ञोपक्रमान्तौ समासान्तौ नित्यं क्लीवे स्याताम् । **तदादित्वप्रकाशने** । कोऽर्थः ? उपज्ञा या उपक्रमः । सेनादित्वप्रकाशने गम्यमाने । शूरसेनम्, शूरसेना । परसुरम्, परसुरा । गोशालम्, गोशाला । श्वनिशम्, श्वनिशा । कूपच्छायम् कूपच्छाया । उपज्ञेऽपि—चन्द्रोपज्ञं व्याकरणम् । वेदोपक्रमं धर्माधर्मौ ॥५९॥

कारिका ५९. रात्राह्नौ पुंसि····· दर्शितः ॥

वृत्तिः—रात्रेत्यादि । रात्राह्नौ समासान्तौ पुंसि विज्ञेयौ । सुदिनः पुण्यतः परः अहः शब्दः समासान्तः पुंसि विज्ञेयः । **असंख्यात्**[1] । कोऽर्थः ? अव्ययात्परः पथः क्लीवे स्यात् । कुशब्दात्परः पथः शब्दः क्लीवे न स्यात्—कुत्सितः पन्थाः कुपथः । विकल्पं सर्वसम्मतः इति । **दर्शनमिति** । मतान्तरमप्यस्ति । (अहश्च) रात्रिश्च[2] अहोरात्रः । सुमह्न (?स्वह्नः) । मध्याह्नः । द्व्यह्नः । **अहः असुदिनपुण्यत** इति । सुदिनम् । पुण्याहम् । अपथम् । (कुपथः, कापथः[3]) कापथिचेति कादेशः । पथः विशं विशथः (? विपथः, विपथम्) ॥ **इतिचन्द्रदासकृतौ समासोद्देशः** ॥६०॥

टिप्पणम्—अहश्च रात्रिश्च अहोरात्रः । वर्जने तु—पुण्याहम् । सुदिनाहम् । पथ इति अदन्तनिर्देशात् । अदन्ते नपुंसकत्वं भवति । अपथम् । कापथः । विपथः विपथः (? विपथम्) ।

कारिका ६०. सम्बन्धे कारके·····अपि ॥[4]

वृत्तिः—सम्बन्ध इत्यादि । वैष्णवो विप्रः । शैवः । कौसुभम् । हारिद्रम् । कर्मण्यण् । कर्त्तरि—वैयाकरणः । करणे—एकादशी । सम्प्रदाने—अप्रासामिकः (? दिकः) । अपादाने तद्धितो न दृश्यते । समूहे—कारकाणां समूहः कारक्यः । भावे—शुक्लता, शुक्लत्वम्, शुक्लिमा । **अव्ययः** । सर्वस्मात् । सर्वगोत्र इत्यपत्ये । उपगोरपत्यम् औपगवः । **परत्रे** चेत्युक्तेभ्यः

---

१. असंख्यात । २. अहश्चेति पदं नास्ति । रात्रः । ३. मूले नास्ति।
४. द-इत्यनन्तरमिति चन्द्रदासकृतौ तद्धितपटलः षष्ठः ।

सम्बन्धादिभ्योऽस्मिन् तस्येदं तत्र साधुरित्यादि—नगरस्येदं तत्र भवो वा नागरम् । समासान्तः[1]—महाराजः । नञासुदुभ्यः प्रजायास्तु व्रीहिवस्यत्राता (?) अप्रजाः । सुप्रजाः । दुःप्रजाः । [2]अन्याल्पाभ्याम्—मेधाया मन्दमेधा । चकाराद् अमेधा, दुर्मेधा । तथा धर्मस्य नान्तता—अल्पाधर्मा । चन्दनवत् गन्धोऽस्य चन्दनगन्धिः । पक्षे—चन्दनगन्धः । वाचासि दन्तस्यमनः (? चत्वारो दन्ता अस्य), शोभना दन्ता अस्येति सुदन्तः चतुर्दन्तौ ॥६१॥

इति चङ्गवृत्तिविवरणे तद्धितोद्देशः ॥

समाप्तश्चायं ग्रन्थः ॥

संवत् १८६६ वर्षे मिति भाद्रपदकृष्णे अमावस्यायां[3] रविवारे लिपीकृतं हमीरविजयेन । श्रीहरिदुर्गे ।[4]

राधेमासि शुक्लपक्ष अष्टम्यां शनिवासरे ।
कृष्णचन्द्रस्य दासेन लिखिता चंगवृत्तिका ॥१॥

—:o:—

---

१. विसर्गाभावो दृश्यते । २. अन्याल्पा० । ३. अमावस्यां । ४. ०दूर्गे ।

परिशिष्ट ३

कारिकाणामकाराद्यनुक्रमणिका

(अत्र प्रथमपृष्ठाङ्कः मूलग्रन्थस्य द्वितीयश्च द्वितीयपरिशिष्टगतोऽवगन्तव्यः)।

कारिकाङ्कः	कारिकार्धः	पृष्ठाङ्कौ
४४	अधिना सप्तमी साम्ये	२३, ५८
२८	अनन्तरविधेयोऽस्य	१४, ५१
१४	अभावादभिधेयस्य	७, ४५
४६	आधारे सप्तमी ज्ञेया	२१, ५७
५५	इतरेतरयोगे च	२७, ६२
३०	इव (द्रव्य) कृद्भावे स्यात्तेन	१६, ५२
१६	उक्तमेवोक्ततां याति	८, ४५
२	उक्तस्यार्थस्य गृह्णन्ति	१, ४०
४३	उपर्यादिभिरप्यस्तैः	२२, ५८
५३	उभौ तत्पुरुषावुक्तौ	२६, ६२
३१	एकः कर्त्ता क्रियानेका	१६, ५२
८	एकदा चेत्क्रियाकाल	३, ४२
३३	कृतो धात्वर्थसम्बन्धे	१७, ५३
२६	गत्यर्थात् क्तो भवेत्	१३, ५०
१०	गतिबुद्ध्यशनार्थानां	४, ४२
१९	चङ्णौ कर्त्तरि स्याताम्	१०, ४७
२१	चतस्रोऽतीतकाले स्युः	११, ४७
१	जायन्ते यदनुध्यानाद्	× ३९
४२	ततश्चानादरे ष्ठी	२१, ५७

५२	तद्धितार्थे समाहारे	२६, ६१
५६	तस्मिन्नल्पस्वरं पूर्वं	२८, ६३
३	द्वयोर्नाम्नोर्बहूनां वा	२, ४०
३५	द्वितीया कर्मणि प्रोक्ता	१८, ५४
३८	निष्ठोदन्ताव्ययो०	१९, ५५
१२	नीखादह्वादिशब्दाय०	५, ४३
३६	पञ्चमी स्यादपादाने	१८, ५४
१७	परस्मै वक्ति कर्त्तारं	१०, ४६
४	प्रकृतेर्विकृतेर्वापि	३, ४०
१३	प्रधानं नीवहादीनां	६, ४४
७	प्रयुक्ते गम्यमाने वा	३, ४१
२५	भावकरणयो खल०	१२, ५०
२७	भावाधिकरणे व्याप्ये	१३. ५०
२४	भावे कर्मणि कृत्याः स्युः	१२, ४९
२३	भावे शब्दान्तरप्रयोगे	११, ४८
४८	मन्यतेरप्यनावादौ	२४, ६०
५४	यत्रानेकं परस्यार्थे	२७, ६२
३४	यत्रार्थे नाभिधीयन्ते	१७, ५३
९	यदा ह्यर्थेन निर्दिश्ये	४, ४२
१५	यदेवोक्तं विशेष्येण	७, ४५
१	यस्मिन्नर्थे विधीयन्ते	१, ३९
४६	यस्मै कुप्यति तस्माच्च	२३, ५९
५९	रात्राह्नौ पुंसि वा ज्ञेया०	३०, ६४
६	लिङ्गसंख्याविभेदेऽपि	३, ४१
३७	वा घञादेरकाकारे	१८, ५४
३९	वा तु कर्त्तरि भावे क्ते	२०, ५६

५८	वा स्युः सेनासुराछाया	२६, ६४
४७	विना युक्ताद् द्वितीया	२४, ५६
५	विशेष्येण सहैकार्थे	२, २४
५१	विशेषणं विशेष्येण	२५, ६१
३२	वुणतृचप्रभृतयः सर्वे	१७, ५३
२८	श्लिषः शीङो वसो	१३. ५१
५७	षष्ठी तत्पुरुषेराज०	२८, ६३
४६	षष्ठी स्याद्धेतुना	२४, ६०
५०	समस्यन्ते द्वितीयाद्या	२५, ६१
६०	सम्बन्धे कारके वृन्दे	३०, ६४
५४	सरूपे यदि वा युद्धे	२७, ६२
१८	सर्वे विकरणाः	१०, ४६
४५	स्तोकादेः करणे	२३, ५८
४०	स्मृतिर्हिंसार्थयोरेवं	२१, ५६
२२	स्वस्तने स्वस्तनी नित्यं	११, ४८
२०	हनिग्रहिदृशिभ्यश्च	१०, ४७
११	हृक्रोरनिणि यः कर्त्ता	४, ४३

—:०:—

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
VI	९	०सकाये	सङ्काये
VIII	४	ग्र-थस्य	ग्रन्थस्य
VIII	१८	०वावगम्पते	वावगम्यते
X	२८	भोत्तस्यैव	भवेत्तस्यैव
XV	२६	श्रा	श्री
XV	२७	इत्पनेन	इत्यनेन
१	१०	गृह्णाति	गृह्णन्ति
११	११	स्वस्तने, स्वस्तनी	श्वस्तने, श्वस्तनी
११	१३	,, ,,	,, ,,
१२	११	क्वचित्कृत्यः	क्वचित्कृत्याः
१२	१३	भवः	भुवः
१५	१०	ऽस्यामिति	ऽस्या इति
१६	७	कृत	कृत्
२०	११	द्विषनयम्	द्विषन्नयम्
२२	१५	माषस्य	माषानस्य
२५	१०	कृष्णाश्रित	कृष्णश्रित
४१	४	बहुल्येन	बाहुल्येन
४१	१२	लिङ्गसंख्या	लिङ्गं संख्या
४१	१६	तदाऽद्वेशते	तदा द्वे शते
४४	२	तं	तत्
४७	८	सहाय	सहायं
४९	१५	भृङ्क्ते	भुङ्क्ते
४९	१५	विद्योतत	विद्योतते
६५	११	शुक्लपक्ष	शुक्लपक्षे

—:०:—